गाथा मङ्गयानकम्
सविवरणम्
२४८

१०५ पन्ना

र्थः॥ अथवा। यो नामेत्थं देव्याः प्रणयस्य देवस्य च सौभाग्यातिशयस्य सूचकः संध्यासलिलांजलिः स खलु विदग्धानां वंदनार्हः॥ अतस्तं न
मतेत्युपदिशंती दूती प्रणयिन्याः प्रणयरोषमसहमानं नायकमनया गाथया प्रबोधयति। अयमाशयः। अनभिज्ञः खल्वसि प्रेमसद्भाव
स्य यत्त्वमेवं प्रियाप्रणयरोषेषु हर्षस्थानेऽप्यमर्षि। न पश्यसि देव्याः संध्यासलिलांजलावपि प्रणयरोषमिति॥१॥ कोषविरचनप्रयोजन
माह॥ अनिजसौंदर्यादिगुणकथनेनापकर्षिताप्रकाशनेन वा समुत्पन्नकांतं प्रतिव्यभिचारिणीवचनं वामन्त्रमित्यादि। शृंगाररसस्य रसनि
र्भरत्वेनाह्लादकत्वादमृतमिवामृतं प्राकृतकाव्यं अवसरे पठितुं परपठितं वा श्रोतुं बोद्धुमित्यर्थः। ये न जानंति कामस्य तत्त्वचिंतां कुर्वं
ति कथं ते न लज्जंते॥३॥ उपायं विनोपेयं लब्धुकामा उपहास्याः स्युरित्याशयः। कामिनीजनानुरंजने हि नाम कामशास्त्रकाराः सम्यग्योचितलालि
तगाथापाठमेव तदुपायमामनंति। तथा च वा[illegible]मनः। गाथापाठे त्वमसृणं मदनाग्रदूतीरिति। इह त्रिपाटवार्थकोऽस्य संज्ञिमसारतामा
हासन इत्यादि। मध्य एव मत्कृआगादेशीशब्दः। कविवत्सलेनेति कविनामांकितगाथासंग्रहेण तत्कीर्तिं स्थापयता तेन विस्रेहो दर्शित इत्या

स·कु·

२

ग्र्यः। हालेण शालिवाहनेन· सालंकाराणां गाथानां कोटेर्मध्ये सप्तशतानि विरचितानि। श्रीहालस्य·। संभोगो विप्रलंभश्चेति द्विविधः शृंगा
रस्तत्रोपादेयत्वात्संभोगस्य प्रथमाभिधानं·। संभोगे च प्रच्छन्नकामितं स्पृहणीयमिति प्रागभिसारिकाया ग्राम्यधर्मतयोत्साहनेप्यग्राम्योक्ति
कौशलमाह। उम्मणिअ इत्यादि। उन्म·पश्य·निश्चलेति वेगविधारणप्रयत्नवशाद्वा· अन्यागमनशंकया वा प्रच्छन्नव्यापारविमुखसुभगसं
बोधनं· निस्पंदा किं विच्चल नशून्या विसिनीपत्रे· रेहइ· शोभते बलाका· बकी। निर्मलमरकतभाजनपरिस्थिता शंखशुक्तिरिवेति· शंखर
चिता शुक्तिरिव शंखशुक्तिः· अत्रायमाशयः। यदि वेगविधारणपरोसि· तदैनां बलाकां पश्य प्रच्छन्नव्यामनस्कतया चिरं रमस्व· अथ भीतोसि तथा
प्येनामनाशंकनीयजनसंतापतया प्रदेशस्य· निश्चेष्टसुप्तां वीक्ष्य निरातंको रमस्वेति। अत्र नयाचैवं विधोपमाप्रयुक्त्या आत्मनो धनवत्तां
व्यापयंत्या नाहमसखोचिनी किंतु त्वद्गुणाकृष्टहृदयेत्यनुरागो विदग्धत्वं च सूचितं। नायकस्य च चिरंतनान्यपरेण श्लाघ्यं विज्ञत्वमभिव्यक्तं।
यदुक्तं। यत्नान्नायोपचर्याः स्त्रीयथाये श्राप्नुयाद्रतिमिति। ४। बोडिसस्स·। यथा रत्यन्तु न्यादे स्त्रीणां पुंसि दुर्विदग्धबुद्धिरनिच्छा च भवतीति तथा

रतिशास्त्रे सत्यां रतिशीलत्वादपि स्यादित्यनन्तरं निषेधार्थमाह। तावद्विभ्रम इत्यादि। तावदेव रतिसमये विभ्रमाः शृंगारचेष्टाविशेषाः पुरु
षाणामित्यर्थात्। महिलानां स्त्रीणां हृदयहरा भवन्ति॥ तावद्विभ्रम इत्यादि। तावदेव रतिसमये विभ्रमाः शृंगारचेष्टाविशेषाः पुरुषाण(
मित्यर्थात्। महिलानां स्त्रीणां हृदयहरा भवन्ति। यावत्कुवलयदलसदृशानि स्त्रीणां नयनानि रतसुखश्रमेण न मुकुलयन्ति। तत्र श्रम
रतान्ते ह्वेपयति तत्त्वं नागरके इत्यर्थः। अथवा नायिकायाः सख्याः शिक्षोक्तिरियं। सुरते विभ्रमाः स्त्रीणां तावद्दृश्यन्ते। यावत्पुरुषाभाव
प्राप्तिनिमीलितनयना न भवन्ति। अतस्तथाविधं तमुपलभ्याश्रमरतिसुखया विश्रामरतिसुखयैव त्यक्तविभ्रमया भवितव्यमित्यर्थः।
शान्तात्मा नस्क संसारासारताप्रतिपादनतात्पर्यमस्या गाथाया व्याचक्षते। इह हि युवतिजनविभ्रमाः संसारसारतया वर्ण्यन्ते। ते च यावद्दे
गमुपरमो न भवति। तावदेव विराजन्ते। पश्चात्तु विरसा एवेति॥५॥ तुल्योऽहस्मः॥ ॥निजनववधूरोपितकुरवकप्रथमकुसुमोद्गमं हृष्टा तत्क
थनदक्षाय कान्तं दानमार्गणा वा दुश्चतुरे कान्ते सखीजनस्य तत्कान्ताप्रथमगर्भमहोत्सवकथनकौशलमाह। णोहलि अ इत्यादि। अ

म॰टी॰ २ ३

शतगुणवत्फलो ऽहममममिति मदालिंगनेन कुरबकस्य फलो ऽहमं प्रार्थयसे आत्मनः किमिति पुत्ररूपनवफलं न प्रार्थयसे इत्यहो ते ज्ञा
ऽज्ञमित्यभिप्रायः। नवफलिकां नवफलो ऽहमकथनानंददेयाभीष्टं कुरबकतरोर्मृगयसे। आत्मनः किमिति पुत्ररूपनवफलं न प्रार्थय
से इत्यहो ते जाड्यमित्यभिप्रायः। नवफलिकां नमृगयसे अहमेव मत्तवनवफलं धारयामीत्याशयेन तत्र जायाचलितस्तुत्वपंकजं हसति।
लज्जया प्रतिबद्धातायकं वक्त्रमज्ञमातिर्यक्सुखहसितेन सूचयतीत्यर्थः। सुभगेति नायिकानुरागसूचकं संबोधनं। जायेत्यपत्यज
न्मयोग्यतासूचकपदं। क्षाम अरत्नमेण स्मर॥ वरस्त्रीचरणताडनमशोकतरुदोहदं त्वयैव कारितेयं ममसखी तव विरहे लज्जावसरसा
तु शय्या शोकतप्यमाना दुष्करं यदि जीवतीति सूचयंती काचिद्दूरवर्तिनि वसंते यास्यतः सखीकांतस्य गमनाक्षेपार्थमाह॥ ता विज्ञ
तीत्यादि॥ लडहविलज्ञाउं शोभनवनिताः अशोकेत्यननुभूतशोकत्वात्परपीडानिर्दयेति भावः। दयितविरहेताप्यंते। एतदेव
द्रढयितुमर्थान्तरन्यासमाह। किं सहते कोपि कस्यापि पादप्रहारमिति। नान्यो पि सहते किं पुनरशोक इति भावः। प्रभवन्नित्यवसरशास्या

राम २

समृद्धो भवतु· कांतसंनिधेस्तु शुभाभावाभावान्न तापं त इत्याशयः॥ अथवा प्रोषितभर्तृकायाः कांते तत्सखीलेख्यगाथेयं॥ असंयुक्तयो
ःसंयोगः संयुक्तयोर वियोगश्च मन्मथी व्यापारः॥७॥ अमरा अस्स॥ विपलधां प्यत्थ्यूं प्रत्याश्वर्यकथनव्याजेन संकेतस्थानगमनमार
म्मनोज्ञा रंथ्या वयंत्याह॥ ॥अत्ता इत्यादि॥ अत्तेति श्वश्रू संबोधनं· तथा रमणीयमस्माकं ग्राममध्यमंडनीभूतमित्यस्तु कंपा हृता पद्मिनी
खंडस्य श्वश्रू वित्ता हिमदग्धपत्रतया दंडमात्रावशेषत्वात्स्थूनतिलवाटीमह्दं शिशिरेण कृतं बिसिनीषंडमिति· अत्र पद्मिनीवनात्तु कंप
याश्च श्वश्रूं प्रत्योदार्यजारं तु प्रति तिलवाटिकायां संकेतितपद्मसरस्त्वं तु नगत इति खेदः सूचितः॥ तिलक्षेत्र कमलाकरसंकेतस्थानाभावा
द्गृह एव संकेतस्थानमिति भावः॥८॥ कुमारिलस्मा॥ बूनेषु शालिक्षेत्रेषु क्वापि प्रियसंगमो भविष्यतीमुहृद्ग्राममभिसारिकां काचिदाह
॥ किं रुअसीत्यादि॥ पाकवशाद्धवलायमानेषु शालिक्षेत्रेषु किमवनतमुखी गोदिषि॥ जातान्यूने ब्बब्धे पुपीतकुसुमस्तवकनिकानि
करनिविड शिखरशाण तरुनिवह निरुन्तरतया हरितालमंडितमुखीइवेति रूपकं॥ अतो न दीव शाणकेदारा जाताः॥ वाडशब्दो देश्यः स्थान

स॰टी॰
४

वाची॰ तथा वात्रैव वक्ष्यति॰ कुच्चवहो ज्जलइज्जसवाइंमीति। शणवाशिकेति पक्षे रूपमायालिंगभेददोषः स्यादिति। अथवा पाकाभिमुखेषु
शालिक्षेत्रेषु हर्षस्थाने ष्वपि रुदितलज्जितशालिक्षेत्राभिसारिकापि कया पिपरिहासशीलयैवमुपहस्यत इत्यर्थः॥८॥ अहिअसा।
कापि कलहांतरिताया सखी विरहविधुरत्वप्रतिपादनेन तत्कांतेचित्तमावर्जयितुं कांतं तु दृष्ट्वा भिमुखी वक्तुमाह॰। सहिए इत्या
दि॰ मसिविद्य प्रवलितमुखचंद्रमारुह्यतामिति निर्यगपवर्जितमुखतया रुदितस्यानिक्रुवंस्वयं त्यामसखीजने पिमानस्यातिवेलत्वं कां
तेवानुरागातिशयः सूचितः। एतेषामिति तथा निष्ठरमूर्तेंजनस्य संवंधिनी नांवालकर्करीतं तु कुटिलानां प्रेम्णामीदृशेव गतिरिति सं नि
हितमेवानुवर्तनेनैव प्रितमेवदेष्टव्यं तिमना गंगाकृष्यापितु द्यं तितद्यावदन्यत्र हृदानुवंधोनभवतितावदेव उदितं त्यक्काकांतमनुवर्तस्वे
तिसख्यामुपदेशः। तत्कांतेन च विरहविधुरेयं मानिनी तदेनामनुनयस्वेति व्यंग्यो र्थः॥१०॥ सिरिराअस्स॥ ॥ कृतकलहयोर्दंपत्योः रात्रि
वृत्तमनुसंधायायातामसपत्नी सपत्न्याष्टष्ठाताम आह॥ पाअइइत्यादि पष्ठुरिति स्वामिनो न तु वल्लभस्य पादपतितस्य पृष्ठं पुत्रे समारोहती

राम
४

विगलितधैर्यो वनायामप्यनुरक्त इत्याशयः। नुदय्यथने इत्यस्य तु देहि मइति हमः। हट मनुव्यथितायाश्च पीत्यत्र महजविद्वेषस्वको
दटशब्दः गृहिण्या गृहस्वामिन्याश्च समदोदासीत्वहेतोरित्याशयः। हा मोनिष्क्रांत इति। तथा विधपृष्ठारोहणमधोमुखत्वसुरतस्मरणमासा
य निर्गतः। न तु रोषोपशमादिति भावः। एतेन स्वाधीनभर्तृकाया स्सौभाग्यगर्वादनादरः पत्यौ। पत्युश्च विरक्तायामपि स्नेहमोहः प्रकटि
तः। अथवा कोपि किमपि कारणमासाद्यानिच्छतोप्युत्पद्यते भावः इत्यस्यार्थस्य निदर्शन गाथेयमिति॥ १०॥ शीडाडम्बा॥ निरुद्धस्वार्थाद्रू
तीकमपि युवानमाहास्त्वं इत्यादि। स त्वं जानाति द्रष्टुं यतोऽनन्यरूपश्चाविनीतरूपं वक्रमन्यत इत्याशयः। सदृशे जने युज्यते राग इति
रूपाभिजनादिभिरनुरूपे त्वयि तस्याः संगमौत्सुक्यं युक्तमेवेति नायिकायाः स्तुत्यनुरागाभ्यां नायकप्रोत्साहनं। प्रियतां न त्वां भणिष्यामीति
अनभ्युपगमे नायकस्य स्त्रीवधपातकमात्मनश्च प्रार्थनाभंगभीरुत्वं दर्शितं। मरणमपि श्लाघनीयं तस्या इति। अनुरूपानुष्ठानाश्च हृत
चिंताया मरणे जन्मान्तरे त्वमस्मि संभवाश्चेत्यर्थः॥ ११॥ हालस्या॥ कोपि युवा कामुकधर्म्मं मग्नो समाधाय स्वाभिलाषं प्रकाशयन्नुत्कार

स·टी·
५
5

मारुते मा ज्वलत्यग्रेऽङ्कुद्धंती नायिकामाह॥ ॥रंधण इत्यादि॥ ॥रंधनकर्मनिपुणिके इति रंधनपरतया त्वद्दवलोकनकौतुकेपगतम
पि मां नावलोकयसीति भावः। माऽन्नरसु· मा क्रुध्यत वाधराक्तेरग्निफूत्कारोचित स्य·रक्तपाटलाकुसुमस्येव सुरभिशीतलोगंधोयस्यतं·सु
खमारुतं पिबन्नक्ष्माययते शिखी·रोषारुणत्वमुखदिहृज्ञयेव क्ष्मो ऽम्नतवाडु मा चरति। न प्रज्वलति·ज्वलितस्यतत्साम्यसंभवादि
ति भावः॥१३॥ भीमसामिणो॥ कापि मलिनत्वाशंकया स्वामिनमर्पितगृहकृत्यपराङ्मुखीं सखीं प्रबोधयितुमाह॥ वरिणीअइ
त्यादि। गृहिण्यास्सवतीकर्म्मलग्नमषीमालितेन हस्तेन स्पृष्टं हसते चंद्रावस्थां गतं पत्युः। लग्नकालिममपि सेतोषपरिहासं चंद्र
णोपमीयत इत्यर्थः। किं चैतेन यस्य यदुचितं कर्म तच्छीलयतो वैरूप्यापत्तिरप्यलंकारायेत्यपि दर्शितं॥१४॥ हालस्स॥ ॥कापि सख्याः का
न्तं प्रत्यनुरागं प्रथमगर्भयोगं च दोहदव्याजेनाह॥ किं किंदे इत्यादि॥ किं किं ते प्रतिभातिसखीभिरिति पृष्टाया मुग्धायाः प्रथमोद्गतदोह
दिन्यां केवलं दयितं गता दृष्टिः। दयिते अभिलाषमेव परं सूचितवतीत्यर्थः। अथवा सपत्नीं प्रति·सा सूयसपत्नीजनस्योपालंभवादोयं। मुग्धा

एम
५

याइति मोहाद्गर्भाया समगणयंत्याः प्रथमदोहदिन्याइतिवक्रप्रसूतगर्भे विज्ञापासुरतायासंपरिहरति। इयंत्वननुप्रसूतगर्भे खेदापि प्रियसं
भोगमेवपरमभिलषतीतिभावः॥१५॥ गअसाहस्स॥ ॥चंद्राभ्यर्थनवक्कलेन विरहेदाहदुस्सहत्वं द्योजयंती प्रोषितकान्ता कान्तसमागम
विधये सखीजनंत्वरयितुमाह॥ ॥अमइत्यादि॥ ॥अमृतमयाक्षिंवोधनवतुष्टयेन जगज्जीवनहेतुत्वम विनलोकलोचनानंदकारि
त्वमवलान्तनमपेन्नपातित्वमाह्लादकत्वंचस्पृवितं दे शशांकः साभ्यर्थनसंबोधने। यैः करैः प्रियतमः स्पृष्टस्तैर्मामपि स्पृशेति काकूक्त्या। ए
वं विधोपि कथं मां निर्दयं दहसि। मम पुनर्वल्लभममृतशिशिरैरेव करैः स्पृशसि यतोद्यापि नागच्छतीति भावः॥१६॥ हालस्स॥ ॥सखिदुं
वखेदमयघ्नो वातवागच्छति कांतः किंत्वागतो प्यसौ निष्ठुरः प्रणयकोपावधीरणेन खेदयितव्यइति सख्योक्ता प्रोषितभर्तृकान्ता माह। ए
हिइइत्यादि॥ एष्यति सप्रोषितइति कान्तस्य निरनुक्रोशत्वात्। अहं कुपिष्यामीति आत्मनश्च कान्तावधीरणसाहसभीरुत्वात्। सोप्यनुने
ष्यतीति। इय च्चिर प्रेमानुबंधस्यासंभाव्यमानत्वात्। मनोरथमात्रमेतदित्याशयेनाह। इस्य न न्नरोक्तानां मनोरथानां मालाकस्यापि भव्यान

स॰टी॰
६
6

नस्यकांते संघद्यते मम मंदभाग्यायाः कृत एतदिति। अथवा प्रोषितभर्तृकायाः कान्ते लेखो यां एवं वा मनोरथैर्मे कालो गच्छतीति भाव
॥१७॥ ॥भिरवभ्भिरस्स॥ ॥किं मेवं विज्ञोसीति सखीभिः पृष्टस्य कांतस्य बहुमहिलाकृष्टिं कापि मेर्ष्यापालंभमन्यापदेशेनाह॥ ॥दुग्गइ
त्यादि। दुर्गतकुडुंबाकृष्टिः कथंनुमयाधौतेन सोढव्या। इतीव मन्वा दशापसरत्सलिलेन पश्यत नु दृश्यमिव पटेनात देवं विधाशंकामात्रे
ण रवेदाद् शागलज्जलक्कुलेनाङ्गः पटो पिरोदितीति। किंपुनरयं विदग्धः सुभगो महिलाछंदानुवर्त्यानखिन्नः स्यादितिभावः। अथवा कृ
तार्त्तवस्नाना हर्षावसरेपि किमिसुद्विग्नेवत्वमिति पृष्टा समानशीलाभिरभिसारिका तासु सौभाग्यमात्मनः प्रकटयंती कामातुरानेकपु
रुषाभ्यर्थनोद्वेगमित्यमन्यापदेशेनाभिव्यनक्तीति। केचित्तु नरन्यमनस्कताविधानमन्यतान्यर्थं व्याचक्षते ॥१८॥ ॥सिरिदेवराअस्स॥
कापि जारं प्रवातमन्याभिसारिकासंकेतस्थानुगामिनमन्यापदेशेनाह॥ कोसंव इत्यादि। किसलयमिव किसलयं स्वभावलौहित्या
त् कृतांगरागत्वाच्च कोशांवकिसलयवर्णकतर्णकवत्सगर्भरूपेति वाभिप्रायः। आलोकनरभसात् समभयमावधानत्वाच्च। उन्नामिता

राम
६

भ्यांकर्णाभ्यांमुपलक्षितहृदयेऽर्पितं निवासयोग्यं अभिसारयोग्यं च गृहं व्रजनृपवल्लवं श्रेष्ठत्वविरक्ततं · च शाश्रुहीति। अथवा · जारगृहगा
मिवत्सानुरामन्याहृलिकवत्से प्रीतिवादोयं। धवलत्वं घंटतां स्वेच्छाचारित्वमितियावत्। अहमिवपराधीनस्त्रीमीभूरितिभावः। अथवायांह
द्रोकामयसेतस्यास्त्वंतर्णकद्रुक्कोषामृदन्नसंकेतापियंप्रेषयतिवा · वत्सरूपेणगोशालांगच्छेतिवा · शुल्कांवरंपरिधायागच्छेतिवाकोषा
श्रः कषायपत्रोहृदयविशेषः।१८॥ ॥गअ्रणस्म॥ ॥कापिभावजिज्ञासार्थंकृतकनिद्राविनिमीलिताक्षं प्रबोधिककपोलचुंबनानुलकितां
गत्वेनविदितमिथ्याप्रसुप्तंकांतंसंबोधयन्त्याह॥ अलिअइत्यादि॥ हतमध्येत्यंगविन्यासरूहस `` मध्यदेह्यवकाशंममेत्यर्थात्। देसुध(
अमङ्केति क्वचित्पाठः। तत्रहेधवदियममावकाशंदेहीतियोज्यं। नपुनश्चिरयिष्यामीतिभावः। एतेननायकस्यभावजिज्ञासकेलिः। नायिकाया
इंगितायूनोरन्योन्यानुरागश्चदर्शितः॥१९॥ चंदसामिणो। चिरयंतीवेश्यांनेतुमागतेहृत्तेभुजंगांतरप्रसंगशंकानिरासार्थंवेश्यामानाड्डु
हितमाह॥ ॥अममन्नइत्यादि॥ ॥असमाममंडनेवज्ञनगृहंतस्य · निसर्गसुंदरैरंगैरेवमंडितासि · तत्किंमंडनंकुर्वतीविरयसीतिभावः॥

विलंबकरणे दोषमाह। बोला इत्यादि। अतिक्रांतः हलहलकः कुतूहलातिशयो येन तस्य चित्ते पुत्रि एणं लगिष्यसि कृतमंडनापि तेन रंजयिष्य
सि। एतेन मंडनकरणे नास्या विलंबो न पुनरन्यप्रसंगो नेति सूचितं॥२१॥ ॥कालरात्रस्स॥ ॥आर्द्रेवेनार्द्रवल्कलेन वा कृतावसना या अभिसा
रिकाया वर्मच्छुतलिप्तमुखलेपविच्छेदस्य परिहारमप्रयत्नं ब्रुवन् स्मरणेनात्मनः सौभाग्यमवधीरितसपत्नीकामुकत्वं च कामिनीजनवि
त्नहरणार्थं नायकमाह। आ अरइत्यादि। वर्णप्रधानं घृतं वर्मच्छुतं तेन रजस्वलानां विकृहे तुर्मुखलेपो देशाचारः। आदरेण प्रयत्नेन प्रय
त्नेन प्रगणमितौ दौ कितावो हो यत्र। अत्र ब्वरितानासा अ संस्पृष्टा नासा यत्र। असंहृतमहृतं ललाटेन ललाटं यत्र तत्तथा। वर्मच्छुतलिप्तमुखायाः स
स्या इति ग्रामयान्त्वपिशाकस्थितसौंदर्यातिगुणे वयस्येवा प्राकृतो क्षागोष्ठ्यां नायिकागुप्तिर्नायकगुणः परिःस्मर्वतः कपोलादौ चुंबितस्म
रामः। अथवा कश्चित्सोवितः प्रियायाः स्पर्शसुखं नामानुरागातिशयसूचकं तत्र द्याविधं परिचुंबितमनुस्मरन्नात्मानं विनोदयतीति गाथार्थः।
अथवा अतिकामुकः कश्चित्तुष्पवतीमस्पृश्यां मन्यमानः श्रीमुखं तु सदा शुचीति मुखमेव चुंबितवान् तस्य रागातिशयं स्मरामि इति भावः॥२२॥

वद्धचिरानुरक्ता॥ ॥जनसंवोधे पि प्रियं शत्रुद्वयभावं सखीं शिक्षयितुं कापि प्रच्छन्नकामुकोक्तं कुलनायायाः गांभीर्यगुणमाह॥ ॥प्राणाइ
त्यादि॥ ॥हर्षविकसितकपोलास्सतीपुरते तथाज्ञाशता निगृह्याणाधरं मुखविकारमित्येवमादीनिदर्शितिगो मे प्रभाते॰ अनवनतमुखी॥
अपि संभावनार्था॰ अहं इयमित्यर्थः॰ अपीयं से ति प्रियात्रगृह्याः सेयमिति प्रियेवनभवतीत्यर्थः॥ क्षेनलोकसमक्षे गूढाकारैतव नायिकाया
नायकशीतिहेतुर्न्नतु धार्ष्ट्यमिति॥ तथा चोक्तं॥ उपहृत्यतथा सर्वं गोपायंत्या नया धुना मन्ये गांभीर्यशीलेदमुपकारान्तरैकृतमिति॥ १३॥ ॥मत्र
रक्ता॥ ॥कुलीनतानमस्कारकुलेनात्मानुरागं पत्यो पत्नु श्चान्यस्या मनुरागमात्मनिवा निह्नुंकाचिदाह॥ ॥पित्र इत्यादि॥ ॥प्रियविरहोऽपि
यदर्शनं च गुरुणी दुःखेयया त्वं कार्यसे॰ तस्य प्रियकारिण्यै अभिजात्यै कुलीनतायै नमः॥ आसमग्रादिदेवेनिदर्शितत्वा प्रथमाशयः॥ ॥अनुप्र
नारो देवं धुतनाम्यर्थनां धर्मेवानुरुध्यमानः कुलीनतया मामुपगतोसि न तु स्नेहेनेति॥ १४॥ वम्रू आरिणो॥ गमनायगृहीतन्नणे विकर्षनगतोसी
ति केन वित्स्पृष्टं प्रतिमपरिहासा काचिदाह॥ एकोवीत्यादि॥ यात्रासमये एको पि कृष्णमृगः प्रदक्षिणं चलन्न्याधेनानुद्रुतोऽध्वशकुनत्वेनाग

मनविघ्नं करोति· किं पुनः कृतस्मारद्वयं प्रियतमायालोचनयुगलं बाष्पाकुलितं पक्ष्मेच्छावाकुलितं प्रदक्षिणं वलदिति। विरहदहने
दह्यमानहृदयायाः प्रोषितस्त्वं पुनर्मे दुर्लभदर्शनो भविष्यसीति प्रदक्षिणं कुर्वन्· एतेन कांतास्नेहनिगडनिबद्धोयं कथं गच्छतीति भा
वः॥१५॥ कालस्यारस्मा॥ अनुनीयमानमप्यनुनयमगृह्णंतं प्रणयिनी सप्रेमदंडमाह। एकत्र इत्यादि। एकत्रेतो इति ल्टृङ्· शेते वदि
ति लृङि रूपं· नाकरिष्य एवमानं निशासु स्वकांतया सह सुखसुप्तानो किं चिद्धि तुद्रा नामन्याभिसारिण्या त्वया शून्याकृतस्येपार्श्वस्य
शय्यैकदेशस्य परिमर्शनस्पर्शनैः अथवा शून्यीकृतपार्श्वत्वात्परिमोषणेन वंचनेन यावेदनातां यदि त्वमज्ञास्यः सा वेदनायदि त्वया
ज्ञाता भवेदित्यर्थः। अयमभिप्रायः। यमेवायं दोषोयद्यहं पतिव्रतानस्यां तदा किं त्वमेवं करोषीति।१६। सुहृदा अस्मा। कृतकलहयोराश्लिष्ट
ना कलनार्थमागता प्रियसखी प्रणयरोषभंगार्थमाह। ॥पणअ इत्यादि। प्रणयकुपितयोर्द्वयोरप्यलीकप्रसुप्तयोर्मानवतोर्निश्चल
निरुद्धनिश्वासदत्तकर्णयोरिति प्रयत्नधृतनिश्वासत्वेन कृतकप्रसुप्तं तयाविधनिश्वासाः कस्मिन्नतत्परतया वाभिलाषितत्वं सूचितं। को म

ल्लोऽस्तु पालंभ प्रश्नः। द्वावपि यावन्नपरस्य रावधीरणसमर्थौ। तदंत्लमेव नात्मानं खेदयित्वेति भावः।२७। कुमारस्या।। कस्यचिद्यूनो रभि
योगं गृहयितुमभियोन्यायाः प्रत्यौवै सुरव्यार्थं हूतीतदुर्न्नेश्रात्रोरन्यो न्यानुरागमाह।। ।।एष्व इत्यादि।। ।।नवलूनताप्रहारमंगोय त्वयत्रेछति
देवरोदातं। रोमां चदंडराजीतत्रतत्रदृश्यते वधाः। कृते प्रतिकृतमिव कर्त्तुलज्जाशीलायाअपि नवोढायास्तेन ते नांगेन रोमांच छलेन दंडरा
जीवधृतेति भावः।। २८। पुलोमस्या।। प्रोषितभर्त्तृकाप्राणेशसमीपगामिनमध्वगंसखीजनंवातदानयनत्वरार्थमा।। ।।अज्ञेम इत्यादि।
अद्य मयातेनवल्लभेन विनागर्जितश्रवणाहर्षात्त्वनभूतानि संभोगसुखानि संस्मरत्या अभिनवमेघानां रवो वधस्यानंनीयमानस्येव वध्य
स्य दोषघोषणपटहध्वनिरिव श्रुतः। एतेनमनिहितास्वपि वर्षासु नागाछतितस्मिन्नह्र वच्रिमे मरणमेतदवगम्यते युज्यते। तत्कुरुतेति भाव
।२९। कल्याणस्या।। कस्याश्चित्संगमायोत्साह यितुं हूतीग्रामपात्रपुत्रं सोपालंभमाह।। णिक्किय इत्यादि।। निष्क्रियअनुरक्तकामिनीजनवैसु
ख्याक्रियाशून्यः। जाया भीतः भार्यापरतंत्र अतएवास्वच्छन्दवारित्वादुर्दर्शन दुर्लभदर्शन· निंबकीटसदृक्षेति तिक्तरुचित्वान्· असुंदरस्य

स॰ टी॰
९
9

हिलानुरागार्थो हावविप्लुवामभयरुचिसमावितिभावः। ग्रामणिनंदनेति भिप्रायःशून्यताप्रदर्शनपरं संबोधनं। तथा पियामाग्रामे निवा(से)
विनासिनीजनस्त्वं वक्रतेतनुकायते। कथं त्वत्संगमः स्यादिति चिन्तया दुर्बलायत इति युवतिजनानुरागकथनेन कमनीयत्वं वर्णितं। श
हरिणाक्ष्यस्म। कमपि सुभटयोषिदभिलाषितां विमृश्य कारिणमुत्साहयितुं तस्याः पत्याव निच्छया पाधातां पुरस्य च सुखनिर्गमप्रवेशतया
निरपायतां हूतीसुभटस्तुतिव्याजेनाह॥ ॥पहर इत्यादि। प्रहारव्रणकिणैस्त्रिंशोन्नतकर्कशेतस्योरसि नाधाहत्क्षेण निद्रां लभते। अनिच्छ
न्त्यपि भयान्ममालिंग्य स्वपितीत्यर्थः। पुरपद्दे तु प्रहरवनमार्गविश्रमे प्रहरगम्योयो वनमार्गस्तेन दुर्गं सुखायमारेत्याशयः। पल्लीकुटी निव
हः। लङ्घ्रणया पल्लीनिवासिजनपदः शुनस्तस्य निरतिशयसत्वशौर्यशालिनः सुखं स्वपिति। अकृतोभयत्वान्नकोपि जागर्तीत्यर्थः। ३। अ
स्मण अस्म॥ कलहान्तरितायाग्रहित्वदोषपरिहारार्थं हूतीतत्कांतमगृहीतानुनयविलक्षमाह। णोउर इत्यादि। नूपुरकोटिविलग्नं चिकुरं
केशं दयितस्य पादपतितस्य हृदयं प्रोषितमानं उन्मोचयन्त्येव कथयति। अयमाशयः। अत्वं डितप्रणयामानिन्योवाचासुरतरागेण

एम
९

वाञ्छना विष्कृतं प्रसादं चेष्टा विशेषेण आविष्कुर्वंतीति। तथा त्वत्पुरा यल्लग्नं तव केशमुञ्चो वयश्चैव हठपरिरंभलोलुभं हृदयं कथितमेव। त्वया त
दनुरूपं न कृतमित्यत स्त्वयैवेदमवैदग्ध्यं न च तस्या ग्राहत्वत्वद्दोष इति॥३२॥ अमरराजस्य। नायिकानुरागकथनेन हृतीमंदस्त्रेहं ना
यकमनुकूलयितुमाह। सनइत्यादि। परपरिधानेन पट्टुषितत्वेन च गर्हिता माला अथवा मालिका रे सुभगेति सखेदसंबोधने· सा सुंदरी त्व
या स्वकेशपाशादाकृष्य स्वहस्तादत्तो· त्वत्करस्पर्शवर्द्धमाना द्वंधरहितामपि उद्घसितं नगरगृहदेवतेवाद्याप्यवमालिकांवहति। इद
मत्राकूतं· त्वद्विरहादिदानीमकृतप्रसाधना सहजसौंदर्यमात्राभरणा त्वद्दत्तस्रिंनतया निर्जीवाले प्यपुत्रिकेव सा शोच्यां दशामुपग
ता। अतस्त्वामनुकंपस्वेति। इत्यमसहिल्लस्य। अन्यवायिकानाम्नासंबोधानुनयत्नं खंडितामविनयोपलंभमाह। अहइत्यादि। अहङ्ग
णं संभावितमार्ग। प्रचारः सुभगत्वयैव केवलं निर्मूढः। इदानीं लोकस्य हृदये अन्यत् वाचान्यत्· मां प्रति हृदयवाह्येनापि प्रियवचसा
सैवानुनीतानत्वहमितिभावः॥३४॥ तोहृस्यस्य। प्रणयकुपिता पृष्टाभिमुखं सुसंक्रांतमाह॥ उण्हाइइत्यादि। प्रिय विरहाडम्मा निनि

श्वसन्निश्वसितानि मुंचन्किं मम शयनैकदेशे पराङ्मुख्योऽस्त्वद्विन्नाम कुर्वत्या इतिभावः। हृदयं प्रदीप्यानुशयेन सपत्नीसमुत्कर्षदृष्टे
नेन दीर्घदोषेण· त्वत्कार्यं तु मुनपिव क्रव्यं· निश्वासैः एष्टं प्रदीपयसि किमलीकदाक्षिण्येन मामात्मानं च खेदयसि। तामेव वल्लभामुपगच्छे
तिभावः।३१॥ अंगणस्थाहूती विरहिणीकान्तमाहागुरुइत्यादि। चिरकारकलं त्वितावधेतव विरहे तस्या निपतद्बाष्पमलिनेन मुखे
न छाया कांतिर्न प्राप्ते वा रविरथशिवेरध्वजेनेव छाया आतपाभावः। तदेवं विरहविधुरामनुकंपस्वेत्याशयः।३२॥ रविसंक्रान्ता। कापि वं
धुवधर्न्नं व वधूं सतीहृन्नशिक्षार्थमाह॥ ॥दिअ इत्यादि॥ ॥देवरस्याशुद्धमनसः कुलवध्वा निजकुड्यलिखितानि· दिवसं कथयति रामानु
लग्नसौमित्रिचरितानि। अयमाशयः। कुतं प्रियाया रामसीतालक्ष्मणानां तं गृहभित्तिं लिखितं कृत्वा तत्र विमातृजेयि सभार्ये रामे अनु
लग्नानि सौमित्रिचरितानि कथयंत्या दुष्टहृदयो देवरः प्रत्याख्येयः। ननु प्रकटं कुटुंबविघटनादिभयादिति। एवमन्यपुरुषपरिहारः प्र
कारो प्यूहनीयः।३४॥ हालस्य। सतां सतिविनाशकारणे पिविकाशोन भवतीति। असतीस्वदोषप्रच्छादनार्थमाह॥ वच्चर इत्यादि॥ ॥चत्वर(

गृहिणी प्रियदर्शना च तरुणी प्रोषितभर्तृका च· असती प्रतिवेशिनी दुर्गता च नवे तु नैव खंडितं शीलमिति। शिरस्त्रालमेन खंडित
मेवेति वदंत्या सख्या भविष्यत्पथिकस्य गमनमाक्षिप्यते। प्रोषितस्य ते प्रिया शीलखंडनमसंदिग्धं संदिग्धस्त्वर्थलाभ इति ज्ञात्वा न
युक्तं गमनमिति भावः।३०॥ हालस्याहूतीयीठमर्द्दमाह॥ ॥तुङ्गं गइत्यादि॥ ॥गोलानूहे गोदावरीतीरे· कुतां गोदूर्वेनस्पन्न वांग
यगशेषेण· जंबूकषायेणात थास्वरेण· सोमाला श्यामा सुकुमारांगी ज्ञाता किलेति म्नावाहसौ शद्वः प्रान छलेन तया त्वदंगसं
गाभिलाषिण्या नवांगरागोच्छिष्टग्रहणं कृतमिति भावः।३१॥ अग्रगणस्या॥ नदीतटकदंवनिकुंजदत्तसंकेतेन कांतेन विप्रलब्धा
नायिका तत्राहं गता त्वं तु न गतइति· तं प्राप्य पत्नी सखीजनमाह॥ ॥नागरइत्यादि॥ ॥जलावर्त्तभ्रमणखंडितकेसरो गिरिनद्याः पू
रेण दरे मग्नोन्मग्न निर्मग्न मधुकरोक्षिप्यते कदंवः। एतेन प्रवृष्टकेसरेण गलितमकरंदे पि कदंवे भ्रमरस्येयमीदृशी दृढप्रेहतेति सखीज
नेप्रत्याश्चर्यकथनं· कांतं तु प्रति प्रस्तुता प्रेम्णस्थिरानुवंधः। संप्रत्येवाहमकृतज्ञेन त्वया छलितेति सपोष उपालंभोयत्र सूचितः।

१०

स.टी.
११

अथवा नदीनिकुंजे कांतेन सहविरहंती नायिका तथा विपन्नमपि कदंबमपरित्यजंतं भ्रमरं दर्शयंती त्वमप्येवं दृढस्नेहो भविष्यसी-
त्यभिप्रायेण कान्तमेवेदमाहेति॥४०॥ तस्सेअ॥ इती कामुकं प्रति पतिव्रता परदनेनाप्यसाध्यतां प्रतिपादयन्नाह॥ ॥ अहि आइत्या-
दि॥ कुलगर्वयुक्त दुर्गतस्य निष्परिच्छदस्सोपहारसपरिच्छदागतस्वजनवर्गसंवर्गणात्तमस्य छायाकृतिः स्यात्। तथा चात्रैव
वक्ष्यति। अवमाणि॰ इत्यादि। अतः पत्युः छायां रक्षंती गृहिणी निजबांधवेभ्यो विभवेनागच्छद्भ्यः कुध्यति। पति विना तु स्वार्थं बंधु-
जनस्याप्युपहारं न बहु मन्यते। किं पुनः कामिजनस्येति भावः॥४१॥ तुल्लोहस्स॥ कामुकजनाभियोगनिरासार्थं कापि स्वाधीन-
भर्तृकायाः सुचरितमाह॥ ॥साहीणेत्यादि॥ ॥ स्वाधीनेपि प्रियतमे ग्रामेपि क्षणे मदनमहोत्सवादौ दुर्गतप्रोषितपतिकां प्रतिवेशि-
नीं संस्थापयंत्या अनुद्विग्नां कुर्वंत्या न मंडितमात्मेति कदाचिदकृतमंडनां मामवलोक्य इयमुद्विग्ना खंडितचारित्रा स्यादित्याशं-
कया नात्मानं मंडयति। तस्या दूरे स्वशीलखंडनसाहसमिति भावः॥ अथवा प्रतिवेशिनीस्थापनार्थमनया मंडनं कृतं। ननु का

राम
११

युक्तं तव विरहविषण्णेयेति सखीशेषपक्षादेनार्थीसस्थावचनमिदमिति ॥४२॥ रविराग्रस्ता ॥४२॥ इतीनायिकानुरागकथनेन
नायकमनुकूलयितुमाह ॥ ॥नूक्रवइत्यादि ॥ ॥नवदसतिशितिहृदयं आभ्यां हृदस्त्वमितिनस्या अन्नि(णी)प्रिये नव विरहे कृशा घितानी
तितस्या अंगान्युपिप्रियाणि ॥४३॥ सुहृदस्ता ॥ अभियोज्या याः पन्तुरक्षतमपिदोषमुद्भावयन्तीतितः किंमन्त्रितुमंगार्थमाह । सद्भावइ
त्यादि । सद्भावस्नेहमयेरक्तेरज्यतइतिपुक्तमिदं अन्यहृदये दुष्टहृदयेपुनर्यत्नहृदयं दीयते सद्भावे नच्यवद्भियते । तज्ज्ञनो हृस्तुपहृ
मति । तत्किमस्मि शठेमानुरागास्मीतिभावः । अथवा कंविडिनायावदूमाकृतव्यलीकमनुनयंप्रतीष्याँ वा दोयं ॥४४॥ रोहाए ॥ विम्
ध्यकारिणं नायकं हृतीसप्रत्ययायनायिकासंगमायशोत्माहयितुमाह । आरंभइत्यादि । आरभमाणस्यलक्ष्मीप्राप्त्यर्थमनुष्टा
नेकुर्वतः । ध्रुवं लक्ष्मीर्मरणं वाभवतिपुरुषस्य । तन्मरणमनारंभेपिभवतिलक्ष्मीः पुनर्नभवति । तत्किमित्यतिसूक्ष्मप्रेक्षितया
लक्ष्मीमिवानुवर्तमानां तामुपेक्षसइत्याशयः ॥४५॥ वल्लहस्ता ॥ चिरविरहमपिसहते प्रियस्तत्किमेवसुहिग्यासीतिवदंतीका

एम
२२

पि विरहोत्कंठिता सनिर्वेदमाह॥ ॥विरहाणलो इत्यादि। विरहानलः सह्यते· आशा बंधे मावधिप्रतीक्षणादिप्रत्याशया यावल्लग्ने
जनस्यैक ग्रामप्रवासो माने र्मरणं विशेषयति। अत्याशाहेतुत्वाद्यमानार्थमरणादतिरिच्यत इत्यर्थः॥८६॥ रसिअस्स॥ गोष्ठी
नायकतावल्लभस्य वर्णयंती विरहोत्कंठिता सखीजनमाह। अज्ज चेइ इत्यादि। सगोष्ठी बंधविदग्धो अद्यैव प्रोषितः। अद्यैव गोष्ठी
स्थाना निरथान्युत्सवदेवकुलचत्वराणि· अस्माकं च तत्संगमाभिलाषिणीनां हृदयानि शून्यकानि जातानि॥८७॥ तस्से अ॥
कांतस्यान्यमहिलाभिमारं श्रुत्वा सवैमनस्यायाः सख्याः सखीप्रबोधनार्थमाह॥ ॥अज्ज वड इत्यादि॥ आरवड ति प्रियाहृद
ये· मनस्यानीयते स्मृतिपथमुपेतीत्यर्थः॥ अन्यमहिलाजनं रममाणस्य दृष्टेवाऽदृश्यमानेवा सदृशे गुणे अभयथापि किमित्युपे
क्ष्यते तथा चोक्तं। पाणौ शोणतले कृशोदरि दरक्षामा कपोलस्थली विन्यस्तांजनदिग्धलोचनजलैः किं म्लानिमानीयते।
मुग्धे चुंबतु नाम चंचलतया भृंगः क्वचित्कंदली उन्मीलन्नवमालिकापरिमलः किं तेन विस्मर्यते। अयमाशयः॥ न हि त्वयि

सुभगायां स्मृतायामन्यस्यां तस्य शेमानुवंधः संभाव्यते· अमुं तत देवसौभाग्यमुन्नीलिष्यतीति भावः॥४७॥ विराग्रतस्य॥ मानिनी
मनुनेतुं हृतीयौवनाद्य मित्यतामाह। णइत्यादि। कतिपयदिनस्थायित्वात्· नदीपूरसदृशे यौवने सदा प्रोषिते सुदिवसेषु गाविश
चयोज्ज्य। पत्रिकिं विदग्धमानेनेति कतिपयदिनानुभाव्ये यौवनसुखविघातकारित्वात्· दाहार्हीयमानः किमस्मिन्नाग्रहेणेति भा
वः॥४८॥ पवराग्रस्य। कापि निशाम्य घनकाकुवादं श्रावणेन विरहासहत्वं यं जयन्ती कांतगमनाद्वेपार्थमाह। कल्लमित्यादि।
कल्यं प्रातः किल निष्ठुरहृदयः प्रवत्स्यति· प्रिय इति श्रूयते जने· तथा वर्द्धस्व भगवति निशे यथा तस्य कल्यमेव न भवतीति। प·।णि
बद्दस्ता। कापि विरहासहासखी मोग्ध्यकथनछलेन तत्कांतगमनाद्वेपार्थमाह। होन्नइत्यादि। भविष्यत्पथिकप्रजायाश्च
पेयाम्यहमित्यलीकया जायां गमनाय प्रश्ने जीवधारणाय रहस्यं तत्त्वोपदेशि प्रियविरहसहनशीलाः स्त्रक्ष्यंतीग्रहं ग्रहेण प्रतिग्रहं भ्र
मति। अस्तु ताव द्विरहस्तव गमनसमय एवमुग्धायाजीविताशा संदिग्धेति भावः॥५०॥ सीहस्य॥ ॥ स्वपतिरन्नार्थमन्या कामुक

एम
१२

म॰टी॰
१३

13

मियोगजननार्थं वा स्वाधीनभर्तृकास्वसौभाग्यमाह ॥ अणइत्यादि ॥ ॥ देशब्दः सामभ्यर्थने संबोधने हे दैवान्यमहिलाप्रसंगमस्म ने
कं दर्शितस्य कृतज्ञस्य खलु यस्मा गुणाः एकत्र समदोषगुणौ न जानंति । एकांतरसाइति पाठे अत्र शब्दः स्वरूपवाची । एकरसाइत्यर्थः ।
एतेन पत्युरनन्यपरता कथनेनान्यकामिन्यवकाशो निरस्तः ॥ पत्युरन्योक्त्या प्रार्थनया अवसरमिच्छंत्याः प्रच्छन्नरताभिलाषस्सू
चितः ॥ ५४ ॥ अणिरुद्धस्सा जातामिलाषा कालक्षेपाक्षमा स्वयंहूतीनायिकापथिकमाह ॥ ॥ घोरं इत्यादि । यत्रातपरविन्ना विश्रा
म्यंति पथिकाः सा छायापि मध्याह्ने शरीरतललीना यस्मात् भयेन स्तोकमपि दृश्यं न निर्यातीति । उ अपयशपातत्त्वया पथिक किं न विश्रा
म्यसीति अचेतनापि छाया न निष्क्रामति किं पुनः कोपि चेतनः ॥ तत्स्य विविक्तनिरपाय मध्याह्नाभिसारसुखमनुभवावसरस्ता
श्चयः ॥ ५५ ॥ सुरहिवच्छस्सा ज्वरंश्ला श्वाक्छलेन विरहोत्कंठिता विरागतकांतोपालंभमाह ॥ ॥ सुहडइत्यादि ॥ ॥ सुहडछ अशदो
अस्वस्य वार्त्ताकारके । अ स्वस्थवार्त्ताकारकमिति लोकभयानंतस्नेहादागतमिति जनमस्सा कं दुर्लभमपि हृदादानयन्नदुर्लभमपि

राम
१३

यात्न यत्नाद्दुपकारकज्वरजीवमपि न यत्नकृतापराधोस्मि एवानांपश्यत्वि क्षिप्तित्वयि किं मम मरणमेवाश्रयः तच्च त्वद्दर्शन सर्वकं साध

यता ज्वरेण मम मोपकार एव कृतो न त्वपकार इति भावः ॥५४॥ गगा वमस्मा ॥ ॥ उद्धूता नायिका वार्त्ताकरणागतं कांतेसे र्घ्यमाह

श्रामइत्यादि । श्राम शब्दः सेर्ष्यानुमतौ ज्वरो मे मंदो अथवा न मंदो जनस्य का चिन्ता । महदुःखा दुःखितस्य भवतः किमनेन प्रश्नेनेति

भावः ॥ हे श्रमत्वस्य वार्त्ताकारक वहुवल्लभत्वात् सुभगः श्रियांगसंगसंक्रांतपरिमलत्वात् सुगंधगंधगंधिता जात ज्वरगंधामास्पृश

मदंगस्पर्शसंक्रांतज्वरगंधमात्मानं कुर्वन्स्त्रियायाः कृतापराधो माभूरित्याशयः ॥५५॥ हालस्मारतरभमादाक्षिप्यकांत मारब्धसु

रुषायितां सुकुमारत्वाद्व्यायासेनैव श्रांतां कांतां नायकः सोत्माहनार्थमाह । मिहिपिच्छ इत्यादि । ग्रस्तमाल्यानुकीर्णत्वात् मयू-

रपिच्छवत् तुलितः केशोयस्याः आयासाद्धेपमानाऊरुद्वयस्याः श्रमाद्धिनिमीलितार्द्धे अक्षिणीयस्याः सा तथा । सर्वत्र संबोधने । इय

सुरुषायितशीले विश्रमणशीले जानीहि उरुषाणां यद्दुःखं । पद्ये मरस्मः ॥ ॥ वेश्यापूर्वनिष्कासितस्य पुनरुपार्जितविभवस्

एम
१३

म॰टी॰ भुजंगस्य संगमाय प्रेरयंती जननीमाह। प्रेम्णेत्यादि। प्रेम्णो विरोधित संधितस्य प्रत्यक्षं हृष्टव्यलीकस्य कृते अनुमितेव विजे
१४ प्रियेऽप्रतीकारः संभवति हृष्टे तु नास्तीति भावः। उदकस्येव तापितशीतलस्य विरसो रसो भवति। पर्युपास्यमानोऽप्यसौ नानुरक्तो भ
विष्यति। तत्किमाम स्थाने ज्ञपयसीति भावः। अथवा तथाविधस्यैव भुजंगस्य पुनर्द्दुहितृस्नेहकथनेनाभ्यर्थनपरायां वेश्याजनन्या
मयं वादः। ५७। वमाह स्मा। वर्द्धशोत्तुभूते र्थे भविष्यतिवद्भूतवत्सत्ययो भवतीति निदर्शयन्कश्चिद्वंद्याः पतिशौर्यं वर्द्धमानमाह॥
वल्गवइत्यादि। करिमरीवं दी। सिंजिनी धनुर्गुणः। अतिवमको रकारित्वाहत्त्रपतनातिरिक्तं पत्युर्धनुर्गुणनिर्घोषं श्रुत्वा सहग्व
न्दीनामपि सहेवनीयमानान्यक्षीणि श्रोस्थितानि। आगतो मे भर्त्ता भवती रविमोचयिष्यति तत्किमद्यापि रुदितेनेति भावः॥५८
कंडस्मा। वंद्यां जाताभिलाषश्चौरस्तु वापतिशौर्याभिमानिनीतां समुत्साहभंगार्थमाह। करिइत्यादि। हे वंदि अकालगर्जनशीलज
लदाशनिपतनप्रतिरवणघः। पत्युर्द्धनूरवाकांक्षणशीले रोमांचं किं सुधा वहसि। ५९। मच्छरन्तमा। वेश्या माता दुहितुर्मद्दुत्वं अु

जंगमस्य च निंदास्तुतिं च जंगमस्तुत्याह घिंतुंतन्त्रिवमाह ॥ ॥सहइत्यादि। सहते सहतेइति तथा तेन रमिता सुरतदुर्विदग्धेन रताव
मानानभिज्ञेन। आश्रणान शिरीषकुसुमानी वस्नानशोभानियथा अस्या जाता न्यंगानि। दर्शकुसुमाउहस्मा। हृतीनायकं नायि
कासुरामातिशयमाह। अगणितेत्यादि। नगणिता शेषास्त्वदन्ये गुवानीय यासा तथा बालकेति स्त्रीरत्नपरिहारात स्त्रीवधपा
तकाचित्तनार्थहिताहितानभिज्ञेत्यर्थः। लज्जालं च नात्यतिक्रांता लोकस्य मर्यादा स्थितिर्यया सा तथा। अथानन्तरं सा पूर्वोक्त
मौर्यादि बहुगुणा तव हृते न त्वद्दर्शनेकृपादिस्तु वेषु प्रसारिता न्नी भ्रमति। तदेवं सम्मीकामावस्थामापन्ना मन्तु कंपस्वेति भावः
। द्धसउ ह्लां ह्रिअसमा। हरिद्रो द्द [illegible] इंधत्ता लेन वश्रनाम भिसारपरतां सूत्रयंती ग्राममणीमातापुत्रशौर्यतासां प्रतिचालमार्थ
माह ॥ ॥अज्जंइत्यादि। अद्यैव प्रोषितः संग्रामगोह्यत्यर्थीतः। उज्जनगरकोजननस्याद्यैव चौरादिभयात्। अभिसरणाभियोगार्थ
मद्यैव हरिद्रापिंजराणि। असतीनामंगराग्रहणहेतोदावर्याः कूलानि ॥ दशग्रीवमरंसस्मा। वंधुवधूः कुलवधूशिक्षार्थमसतीह?

एम
१४

सं०टी०
१५

माहत्र्यसरिसेत्यादि॥ ॥अस्पष्टाविन्नेदेवरे शुद्धमना प्रियतमे विषमशीलेन कथयति ऊर्ध्वं ववि व्रतनभयेनन्तुकायते सुधा। एते
नेना प्रकाशमानं स्वदोषापादकमपि वलवद्विरोधदर्शनाद्रूप्यमिति भावः॥६३॥ दूर्णाहिवस्ता। कलहान्तरितायाः सखीतन्का
न्तेनतद्भाववजिज्ञासार्थं पृष्टा तमाह। चिंतामणि अ इत्यादि। विनानीतदयितसमागमे कृतमनुकानि-कृतोमनुयैस्तानिस्मृत्वा श्र
न्यं कलहायमानासखीभीरुदितामोपहसिता। तस्यास्त्वदनुस्मृतिपरायास्तथाविधं मन्मथोन्मादमवेक्ष्य सखीभिस्तांप्रति
रोदनं कृतं। नपुनरुपहासकारणो मन्युपहासः कृतः। तदेवमनन्यपरां तामनुवर्तस्वेति भावः॥६४॥ विग्गाहराग्रस्मा। कुलजा
भिसारिकानागरकं प्रतिप्रच्छन्नकामिताभिलाषं संवेद्यमाहा। हिअअ इत्यादि। हृदयशेरिति इंगितज्ञैर्गूढेंगितैः स्वसमंअ
समामान्यपिकार्याणि यथामनसि सुखयंति सुखं कुर्वंति। ननथाइ तैरेरनिंगितज्ञैरगूढाकारैश्च समं संभमानीतान्यप्यनुभूता
न्यपि। एतेनत्वद्विधविदग्धस्यसंकल्प्यसंगमोपिवरं न पुनः पामरसंगमागमइत्याशयः॥१५॥ तस्मै अ॥ विरतार्थिनी नायिका

एम
१५

शप्रवेशं जारमप्यमानस्कं कर्तुमाह ॥ ॥ दरइत्यादि ॥ ॥ ईषत्स्फुरितशुक्तिसंपुटनिलीनांजनानामिकाग्रलांगूलं निभं पक्वाम्रा
स्थिविनिर्गतकोमलमाम्राङ्कुरं पश्यत । अथवा· कोमलाम्राग्रस्याग्रांकुरस्य प्रदर्शनेनाहूरवर्तिनं वनागमं सूचयंत्याकांतगम
नविज्ञार्थी गाथेयं ॥ ६६ ॥ वम्हरां अस्मा । अमत्वरते प्रहत्ते य कुलटागृहस्य जनसंचारशून्यतां सूचयितुं जारं वान्यमनस्कं कर्तुमा
ह । उअ हेत्यादि । पश्यत पटलांतरावतीर्णनिजकनंतावूर्ध्वपादैः प्रतिलग्नं । दुर्लक्ष्यो सूत्रे ग्रथितमेकं बकुलकुसुममिव मर्क
टकं । उवरिइत्यादि · । उपरिदरदृष्टस्तन्यं· कलशस्य भग्नत्वात· किंचिद्दवशिष्टकीलकं मिलीनानां पारावतानां विरुतैः सूले
नाभिन्नमिव देवकुलं जातवेदनं निस्तनतीत्यत्र पारावतरुताकारिकं कूजितमयनमिदं क्रियमाणमद्भुतं · निर्जनताप्रका
शनेन संकेतस्थानं विपरीतरतार्थिभावसूचिता । एतेन सौख्यकौशलं वसूचितं ॥ ६७ ॥ ॥ पालितुस्स ॥ ॥ पुराणे देवकुले य
थाभिमतरतलंपटा कुलटा जारमाह ॥ पत्तुपलब्ध्यत्वाद विरुद्धमिति भावः ॥ सूलाभिन्नमिवेति वमकोरकारणेनोपमा

स॰टी॰ विरतत्वामिदं नाथ कस्य। ८८ नाप वरसेण रमा॥ कइ मम धाउ कुसुत्यमम पदस्थाने परं मया न्यस्तं नन्वनुरागादिति प्रियां मिङ्कुवानं युवति
१६ नं काचिदाह॥ जइ इत्यादि॥ ॥विक्कि विल्ले कइमे। किमो पश्रो। यदि कईम मधाउ कुसुतं पदमिद मलसपादमञ्जूगमनयानतव पदेतव
16 स्याबेदन्नं तत्कुसुमरकंटकायमानमंगमिदानीं किं वहसि। अयमाशयः। यदीयं तव प्रिया न भवति तदा कथमनया पदेन तवस्थाने
स्पृष्टो मां वसे जात इति॥ ८९॥ तुहदराअस्सः॥ निजभर्तुरिव प्रिया स्मितत्किं नवमया दुर्भगयेति निरस्यंती नायिकां साभिलाषः कश्चि
दाह॥ ॥जइइत्यादि॥ ॥यदिम वसिन नस्य प्रियादिवसमतन्निस्मरेः सुरतश्रम त्विन्नरंगे रूपलक्षिता। नवस्रूतायाः पीतेन पिश्चेणाभि
नव दुग्धेन मन्नापट्टी वत्सेव किं स्वपिषि। मद्भ्रमः सुरतजागरण एव तेसौभाग्यं ख्यापयतीति भावः॥ ९०॥ अडरा अस्सा जनापवादभीतां वधूं श्व
शितभर्तृकामाह। हे मंतिअ इत्यादि। हे मनीषति दीर्घा सुरात्रिः सुत्वमपि अविनिद्रा जागरहेतोः प्रियसंभोगस्याभावान्निद्रा वञ्चित्रसू एम
त्यातत नश्च हे विरतरश्रो पिनपतिकेन सुंदरं। असमतीशंकाहेतुत्वान्नभद्रं। यदिवा स्वपिषि॥ ९१॥ कंडेमरस्मा॥ ॥विश्यामातादानविसुत्वं १६

भुजंगो पालंभनार्थं दुहितृशिक्षार्थं चाह ॥ प्रपन्नेत्यादि ॥ ॥प्राप्तो भूतः क्षणउत्सवो नशो भर्तुः ॥ अतिशभाते शूर्णिमा त्वं द्वीनशोभत इतिस
र्वत्र योज्यं । अन्नविरसत्वं कामदृतिः सुरतावसानिकोपचारविसुरवइत्यर्थः ॥ अप्रसंप्रदानस्य परितोषः दानं विना प्रीतिः शीतिरेव न भवती
ति भावः ॥९॥ कालरात्र्यस्या । उपक्रमएव विज्ञामहं विरुद्धं जानेतीति दर्शयन्कश्चिदाह ॥ ॥पाणिग्राहणइत्यादि ॥ ॥पाणिग्रहणएव पा
र्वत्याज्ञातं सखीभिः सौभाग्यं । पशुपतिनावासुकिकंकणो हरमपसारितेसति । अणुरागस्या ॥ नवमेह्नोदयदर्शनाङ्गीष्मांतस्याववेलं
वेनेमत्वादयितस्यान्यनारीप्रसक्तिमरेंगां गासंभाव्य विकूर्णयाः प्रोषितपतिकायास्सखीसमाश्वासनमाह ॥ गिम्हेदइत्यादि ॥ ग्रीष्मेदवा
ग्निमषीमलिनितानि दृश्यंते विंध्यशिखराणि । आश्वसिहि प्रोषितपतिकेन भवंतिनवश्राहुइस्याणि ॥१४॥ उवेदीएण ॥ कापिप्रथमसं
गमेऽनुरागातिशयं दर्शयंतं वल्लभं कांतमादिमध्यावसानेषु भिन्नप्रणयानुरूप्यमर्थमाह ॥ जेन्निअइत्यादि ॥ यावन्मात्रं शक्यते निर्वो
ढुं देहि तावन्मात्रं प्रणयं । न जनो विनिहत्त प्रसाददुःखमहनक्षमः सर्वः ॥ एतेनाननुभूतप्रणयखंडनात्वदनुरक्ताहं त्वया खंडित प्रणय

नजीवामीत्याशयः॥७५॥ सुहृदसीलस्य॥ प्रियेकिमेवमद्यापिप्रणयाय वैमुख्यंतनोति। प्रियेकिमेवमद्यापिप्रणयाय वैमुख्यंतनोति। प्रियेणा ने
क्रा मानिनीतस्याः स्थिरस्नेहतामात्मनश्चानुषंगमाविष्कुर्वतीतमाह॥ ॥वद्भुवइत्यादि॥ ॥वद्भुवल्लभस्य या भवति वल्लभाकथम
पिपंवदिवसानि·मा विदिततात्यर्थीर्थेनवैयर्थ्यात्किंपृष्ठंदिवसंमृगयते। ननुकुतोन मृगयते इत्याशंक्याह। कुतोमिहंवभ्रूकंवेत्ति:सु
कृता निश्चयलभ्यमिदं कुतो मे मंदभाग्याया इत्याशयः॥७६॥ अलुहृदस्य॥ काचित्तिं प्रत्यन्यायोघावकाशनिरासार्थंस्वसौभाग्यंमा
त्मनश्चपत्यावनुरागमाह॥ ॥जंजसो इत्यादि॥ ॥यंयंसविर्ध्यायति·पश्यत्यंगावकाशंममानिमिषाक्षः। प्रक्षादयामितंतं इच्छामिचेतेन
दृश्यानं॥७७॥ ॥वसन्तस्य॥ ॥कन्वहांतरितायास्मरवीतन्कांतमागतमनुनयाश्रोव्याहययितुमाह॥ ॥दृष्टमइत्यादि॥ अनयाहद
मन्तुव्याधितयापिदयितेगृहीतोमानः पश्यतवालुकामुष्टिकइवपुरुसुरायमाणः शनैश्शनैर्गुलायतन्नपसरत्यपक्रामति॥७८॥ पालि
तस्य॥ ॥शालिगोपीशालिक्षेत्रेपतंतीसुकपंक्तिंदर्शयंतीजारंसत्वरमन्यमनस्कंकर्तुमाह॥ ॥उअइत्यादि॥ ॥पश्यपयारा(

गमरकैते र्नौहित हरिन्मणिभिः संवलिता· एकांतरग्रथिता नमः श्रियः कंठाद्रूषा कंठिकेव· कीररिंछोली· शुकपंक्तिर्नभस्तलादवतरति

॥७९॥ हालस्या। कापि विदित दुश्चरितापत्या दुर्गस्थान निरुद्धा जारस्य हित हृतीमन्यापदेशेनाह॥ ॥णवित इत्यादि॥ ॥नापि नया

विदेशे ऽस्यानेवंधनस्यानेव या सोऽवस्या नं। दौर्गत्यं निःस्वता निर्गम निरोध स्व ममसंतापं जनयति· चाशंसिते चाशावेशत्रुके ऽ

र्थधने· प्रियसंगमे च विमना निष्प्रत्याशो यथा· यथा शरण विजनः। सप्रश्रयो वंधुजनः। कांत प्रहित हृतीजन श्च निवर्त्तमानः॥८०॥ अभि

मविष्कृमस्म॥ ॥पथिक्ह लेना लिंटको षितस्य जागरस्य जागरं सीत्कारं च शीतेन भावितं ग्रामेव तरतशंका निरासार्थं छत्र यत्नीकु

लराग्रहज्ञनमाह॥ ॥खंधग्गि इत्यादि॥ ॥स्कंधाग्निना हृत्काष्टाग्निना· वनेषु· तृणैर्ग्रामेषु रक्षितः पथिकः· नगरोषितः मातु श्चे

नेवोभयत्र निय करणादन्तु द्वैरेणेव· डिन्न इव दृश्यते। एतेनैतदुक्तं भवति· अस्या शिशिर निशायामस्यां निर्गतिकस्य पथिकस्य वधि

कवराकस्य सातेसीत्कुर्वतः कृतो निद्रेति। अथवा पथिकेन सहरममाणां सवीं प्रतिगृहजनस्य सुरतशंका निरासार्थं सत्यावादो यं।

एम
१७

स॰टी॰ १८ 16

विणआरद्धस्स॥ ॥दृढस्नेहतां विदग्धकामुकतां चात्मनो नागरकः कामिन्यां तरप्रलोभनार्थमाह॥ भरिमो इत्यादि। दशनक्षतो-
र्धं गृहीतेऽधरे खुते शीर्षप्र घूर्णनशीलैरलकैराकुलितं। अतएव बालकाकारापरिमलेन तरलिता न तद्गतो भ्रमंती या भ्रमरावलिस्तया
प्रचलं कमलमिव तस्या वदनं स्मरामः॥८३॥ मो त्ताह लस्स॥ ॥सहचरप्रलोभनार्थं विरःकस्याश्चित्सौभाग्यगर्वसूचकं विद्यो कमा-
ह॥ ॥हल्लफ इत्यादि॥ ॥देशामेवा महिलेत्यर्थे अयंशाहः हल्लप्फलं उत्सूकतरलत्वं। तेनास्मानायप्रसाधितानामुत्सवावसरे स-
पत्नीनां मध्ये अन्न। इअनयाग्नियामार्जनानादरेण प्रसाधनावत्तया कथितमिव सौभाग्यं। रत्याद्यभीष्टभावाशैयौवनाद्यभिमा-
नजः॥ अनादरः स्त्रीत्वंप्रविरोको जायते यथेतिभरतः॥८४॥ कहिल्लसा॥ ॥उद्वर्तनलग्नवलयमक्षिगतमलापनयनप्रयत्नाद्दत्तमि-
त्र विश्रुद्धस्नानां पुष्पवतीं नागरकः साभिलाषमाह॥ ॥एहाण इत्यादि॥ ॥स्नानहरिद्राक्तृतमध्यानिजालानि। जालप्रधानस्य कंक-
णस्य। किलिंचि अं त्तुड्डकाष्ठं तदेव शूल्मायत्वात्कंटकं तेन शोधयंती। संश्लिष्टलग्नमलमपनयंती। कंकरिप्यास्तिकनार्थं। त्वसंगमेनाद्य

एम १८

कस्य तत्र प्रयासफलं भविष्यतीति धन्यास्येति भावः॥ ८४॥ प्रसरस्य॥ नायकस्य प्रवासनिषेधार्थं मततोऽपभोगेप्स्यैवेरस्यार्थं · खलवचनस्य
वाग्रहणार्थं · अकारणस्नेहविच्छेदंपरिहारार्थं च · विदग्धनायिका तत्सखीवाग्गाथाद्वयेन नायकमाह॥ ॥अदृष्टमित्यादि॥ ॥अदर्शने
न प्रेमापैतीति · अतिदर्शनेनाप्यपैतीति पिशुनजनजल्पितेनाप्यपैति · एवमेवाप्यपैति॥ ८५॥ पूर्वगाथामेव स्फुटीकर्तुमाह॥ अदृष्टमणेस्यादि
॥ अदर्शने महिलानां तस्याः क्षीणं लघुहृदयत्वात् · अतिदर्शनेन नीचस्य। ननु त्वद्विधस्य तु उपस्येति भावः॥ मूर्खस्यापि · सुजनजल्पि
तेन · न त्वद्विधस्येत्याशयः। एवमेवाप्यकारणं विनापि खलस्य न त्वत्त्वद्विधसुजनस्येत्यभिप्रायः॥ प्रेमापैतीति सर्वत्र योज्यं। ८६॥ प्रसा
मि प्रसरस्य · नु गाथा॥ प्रथमगर्भायाः सुभगायाः स्तनकालिमकथनच्छलेन प्रसवानन्तरभाविस्तनपतनश्रवणयत्खेडन निर्वेदसूचने
नोत्तरकालं च स्नेहानुवर्तनमंगीकारयितुं सखी तत्कांतमाह॥ ॥पोट्टवइत्यादि॥ पोट्टं · उदरं · यौवनयोगात् प्रणयवद्बहुमानार्थं प्रव
तैर्भूत्वा उदरपतितैरुदरनिषण्णैरुदरभरणाय गृहीतैः श्वङ्कः खंस्थीयत इति विन्नयतोर्मध्यश्चेस्तनयोः कृष्णं मुखं जातं। तस्पाइ वतत्वतः

रम
१८

णयरखेंदुन चिंतयेतिभावः॥८७॥ कथ्यमशीलस्मा॥ अभियोज्यामभियोगं ग्राहयितुं दूती नायकस्यानुरागातिशयमाह॥ ॥सोनुत्कं इति
त्यादि॥ मतवक्रते सुंदरि तथाक्षीणः सुमहिल इति श्लपवद्धा यो पित्वय्यनुरक्त इति नायिकास्तुतिपरं॥ हलिकपुत्र इत्यार्जवं॥ धनिकत्वं
वप्रद्रत्यंगं दर्शयति॥ यथा तस्य मत्सरिण्या पितायया पतिमरणभयाद्रत्यं प्रतिपन्नं। तद्यदि नानुमन्यसे तदा पुरुषवधपातकं ते भविष्य
तीतिभावः॥८८॥ इमाणस्मा॥ कालहांतरिता चिरागते कांते मस्नेहोपालंभमाह॥ ॥दक्खिविणोणेत्यादि॥ ॥दाक्षिण्येनाप्यागच्छन्
॰सुभगासुखयस्मस्माकं हृदयानि। निष्कितवेन यामांगतो मिकानिवृत्तिस्मासां॥ धन्यानामिति शेषः॥८९॥ आइवरहस्स॥ ॥पति
प्रत्युन्यस्त्रीजनावकाशनिरासार्थं स्वाधीनभर्तृका स्वसौभाग्यमाह। एक्कं पइत्यादि। एकं प्रहारत्रातं हस्तं सुखमारुतेन वीजयत्ये
॰सोपिहसंत्यामया द्वितीयेन हस्तेन कंठे गृहीतः॥ आलिंगित इत्यर्थः॥९०॥ मुहवीण॥ राधायाः सौभाग्यं वहुमन्यमानास्सखीकृष्ण
माह। मुहमाइत्यादि। मुखमारुतेन त्वं कृष्ण॰ गोरजः॰ चह्नूरजो राधायाअपनयन्॰ वत्तुः प्रविष्टधूल्यपनयनच्छलेन चुंवन्नित्यर्थः।

एतासां पुरोवर्त्तिनीनां वल्लवीनामन्यासामपि गौरवं हरसि॥ सौभाग्यगर्वखंडनात्। गौरतां वा हरसि। अपमानेन कृष्णीकरणात्॥ नन्दै
वोडिसस्त॥ केलिकलहनिष्क्रांतां कांतेनानुगम्यमानां निवर्त्तयितुं सखी सखीमाह॥ अवलंबीत्यादि। अवलंबितेन न तु परमा
र्थकृतेन मानेन। पराङ्मुख्यास्तव एष पुलकोद्गमः संमुखस्थितं हृदयमागच्छते प्रियाय हे मानिनि कथयतीति योज्यं। न दलीकरो
षमिमं त्यजेत्याशयः॥ ४५ शारदाणा॥ दीर्घबद्धरोषशीलां मानिनीं शिक्षयितुं सखी मानिन्यंतरस्तुतिमाह॥ जाणइत्यादि। जानाति ज्ञा
पयितुं अनुनयं विज्ञा वितमानं परिशेषं विज्ञेनेपि विनयावलंबनं सुरते धार्ष्ट्यपरिहारमेव कुर्वती। अयमाशयः॥ मानेपि मानिनी वि
नयमनुवर्त्तनेन तुल्यमिव परिभवतीति॥ ४६॥ गामहउस्स॥ खंडितावक्रोशः कृतापराधं क्षमस्वेति वदंतं कान्तमाह॥ किन्नावइत्यादि
किन्नावइत्यादि। किं नावत्कृताः अथवा करोषि करिष्यसि वा सुभगेदानीं। हे अनुज्ञाशीलइत्यं भूतवर्त्तमानभविष्यतामपराधा
नां मध्ये साहसु। कथय कतरे क्षम्यतां॥ न शक्यते क्षमा कर्तुमिति निषेधमुखेनैव केवान्स्तोकास्तवापराधा इति ध्वनिना निह

ईर्शिता ॥९४॥ रेवाए॥ दूती दुर्विदग्धं नायकशिक्षार्थमाह ॥ ॥एतमे त्विरित्यादि॥ गोपायंतियेषभुत्त्वं॰ऊषितं दासाद्वयेश्मादेनि
त्तिनएवृमहिलानांप्रियास्तेषामतोन्येदंडप्रयोक्तारः तुनयपराद्भुखाश्च स्वामिन एव राज्ञः श्रेमसद्भावाश्चास्यावराकाः शोच्याइ
त्यर्थः॥९५॥माहवीए॥ ॥भ्रमरापदेशेन दूती गर्भवतीपरिहारिणो नायकस्योपालंभमाह॥ ॥तइआइत्यादि॥ ॥तदा कृता बि
हताद्र॰मधुकरनरमसे॰अन्यासु पुष्पजातिषु॰।बहुफलभारगुर्वीमधुरहिता॰विपरीतरतासमां च मालतीमिदानीं परित्यजसि।
एतेनप्रथमं तथा चाटुशतप्रपंचितप्रणयस्य किमिदमुचितं स्वार्थपरतामात्रं भवत इति भावः॥९६॥आअंगस्स॰॥ ॥अविरलपेल्ल
णीयेन॰तलुणं॰हेमाभितेन॰पूर्वकथितेन॰दृष्टेन॰स्वप्नपीतेन पानीयेनेव तस्मैव न पालयिता॰।दर्शनाभिलाषो न गत एवेत्यर्थः॥९७॥
वल्लस्स॥ सुजनप्रशंसाच्छलेनासती वटतट्टमूलनं ध्यावयंती जारं संकेतस्थानानंतरानुसरणार्थमाह॥ सुअणोइत्यादि॥ सुजनोयं दे
शानिवासेनालंकरोति॥ तमेव प्रवसन्तं ग्रामासन्नोन्मूलितमहावटस्थान सदृशं करोति॥ रहो हन्तविश्रामाद्यभावतया शोषितसु

जनोद्देशस्तस्थोन्मूलितहृदयद्विरपिस्थानमपिदृढःस्वेयतीत्यर्थः॥९८॥ फरकोन्नमः॥ सारिव्यमिमामिति गामनसमये वदंतंप्रि
याभविष्यत्पथिकमाह॥ सौणामइत्यादि॥ मनामसमर्थते॥ पथ्रष्ठोयः शुणमपिदृढयाव॥ स्मर्तव्यंच कृतागतं च प्रेममिरालंवा यदेव
प्रियसमरणार्हं कृतं प्रेमतदेवानाश्रुपत्वानष्टमितिभावः॥९९॥ चव्यइत्योगृहस्थ॥ मंदस्नेहं विरलदर्शनं नायकाहृतीनायिकानुरागक
थनेनानुकूलयितुमाह॥ एणांवसाइत्यादि॥ व्यासंनिद्रेयमिवसा कपोले अद्यापि तवदन्नमंडलं त्वत्कृतमंडलाकारदन्नक्ष
तं॥ वालापथ्यमं त्वत्कृते शीलखंडनाद्विन्नपुलकइतिमंडलेनपरिगतं सर्वतोवेष्टितं रक्षतिवराकी॥ तदेवमनुरक्तामनुकंपार्हामनु
वर्तस्वेतिभावः॥१००॥ थिरमाहमस्त्म॥ ॥इतिश्रीमच्छतकेप्रथमशतकविवरणं॥ ॥स्थिरस्नेहतांकामुकतां चात्मनेन्यनायि
काप्रलोभनार्थंनागरकःसहचरमाह॥ ॥अच्छुउइत्यादि॥ ॥अस्तुतावन्मनोहरप्रियायाःसुखदर्शनमतिमहार्घमत्याहतंसार
वसतिग्रामेतस्यपतन्देवंतस्यमीमापिहृष्टाभ्रूगितिसुखयति॥ सामिश्रूस्स॥ कार्यगौरवलंघितावधिस्तेवल्लभस्तस्मास्यनेष

रमेवागच्छतिलग्नइत्याद्यासर्थंती मात्वलानांप्रोषितभर्तृकाम निर्वेदं साद्र्यं वाह॥ दिट्ठाइत्यादि मन्मथोन्माथहेतवोदृष्टाश्चूतद्रुमे
ष्वाग्रांकुराः आम्रा तासुरा वसन्ते कांतेन सह पानकेलिशीलनार्थं कृतसंधानपरिपक्वसुरागंधोनुभूतः। दक्षिणानिलो वसन्तवातन्
मोदः अतः कार्याण्येपगुरुकाणि दुःखैकभागिन्या मम जीवितस्यैतान्येव महांति प्रयोजनानि। यदेतदनुभवार्थं न त्यजामि हतजीवितं
ततश्च कोवल्लभः कस्य येनाद्यापि तद्विरहे जीवामीत्यात्मानं प्रति निर्वेदवादः। कार्याण्येव गुरूकाणि युवत्यंतरसमागमसुखा(
न्येव तस्य कथमन्यथासौ वसंतेप्यद्यापि नागत इति। किंच वाल्लभ्यमपि कार्यनिबंधनं न तु स्वभावसिद्धमित्यभिप्रायेणाह। मामि
को वल्लभः कस्येति। तथैवमसन्निहितया तस्य प्रयोजनं न तु मयाद्यावहितयेति वल्लभं प्रत्यसूयावादो गाथार्थः॥२१॥ कोत्रफरकस्मास
दासन्निहितपतिकेनवचनमिताभिप्रवासागतप्रियप्रेमनिर्भरसुरतविलसितानामितिसख्याः कास्वाधीनभर्तृकातामाह॥ ॥रमि
ऊणत्यादि॥ ॥रमित्वापदमपिगतोयदोपगूहितुं प्रतिनिवृत्तः। अहं प्रोषितपतिकेव तत्क्षणं सप्रवासीवा॥ ममग्रंदस्मा॥ ॥अवरु

छायास्य पत्न्याः सौभाग्यमगर्वं पिशुन्यावादेन विभवेन च वनिर्विला कुला भिमानिनी मानिनी पतिमाह ॥ धन्यावधिरान्ध्रं धाश्च त एव
जीवंति मानुषे लोके। यतो न स्त एव ति पिशुनवचनं खलानां सुहृदं च न शेद्धं तो। मद्विधास्त्वकृत पुण्या असमानसपत्नी दुर्वा दद
ग्धकर्णा स्तद्विभवा लोकनमसशल्यलोचना जीवंत्यो विस्मृता एवेति भावः ॥४॥ कस्मावि॥ ॥कस्मिन्नपि सूनि जाता भिलाषा कुल
टा निजपतिं श्रुति वैराग्यं नयंतीतमाह ॥ ॥अविग्रएहत्यादि॥ ॥अविरलमपेक्षणीयं समसुखदुःखं विनीर्णसद्भावं। अन्योन्यहृ
दयलग्नमितिः सम्पन्नसद्भावं नत्वहं हृदये स्पलग्नात्त्व सौ ममेति भावः॥ तादृशं च पुण्यैर्जनो जनं कांतं लभते। ममत्वकृत पुण्या
याः कृत एवं विध प्रियप्राप्तिरित्याशयः। अथ वा मंदस्नेहस्य पत्युश्चित्तमनुकूलयितुं सत्या एवमस्मिन्ननुरागावादो यं॥५॥ जन्य रा
गस्स॥ ॥कथं दुःखदायिन्यपि पत्यौ न विरक्तासीति भेदयंती हूती प्रत्याख्यातुं पतिव्रता पत्यावनुरागातिशयमाह॥ ॥दुःखदं तो
इत्यादि॥ दुःखं ददद्दपि सुखं करोति यो यस्य वल्लभो भवति।   पिदतनखव्यथितयोरपि स्तनयोर्दहतोरोमांचः॥६॥ सितिम

स॰टी॰
२२

त्रिग्रस्मा ॥ ॥ मानमवलंब्य पसुरन्तु नय सुखं तावदस्तु भवेत्तिमख्यः शिच्चयत मरवीमितिवदंती कामाविमखीमपरिहासमा
हाधरिर्के इत्यादि । धृतो धृतो विगलतिनावतिष्ठते उपदेशः समानावलंबनार्थः । मरवीमिर्यद्दीयमानः मकरध्वजवाण
प्रहारजर्जरेतस्याहृदये ॥ ७ ॥ माण स्मा ॥ विजनत्वास्माकाकवामकेन दीतटुनिकुंजे दत्तसंकेतेन कांतेन विप्रलब्धातत्रात्मग
मनेन नदीपूरेण संकेतस्थानभंगस्त्री जातेश्च हृदं प्रेमानुवंधं जारं आवयंती कुलराप्रमिवे शिनीमाहा । नहसंइत्यादि । पीलुआ
पत्निशावः । तथा संस्थितस्यनीडस्य वामकस्ये कांते शावरद्धाणेकदत्तमनाः अगणितविनिपातभयात रुणामहे वानंतरभा
विनिमज्जनमगणयंती पूरेणानवजलौघेन समं वहतिकाकी ॥ ८ ॥ कुसुम्रस्मा ॥ मधूकपुष्पावचयच्याजेन कृतरताभिसार
वमरां कुलटामधूकतरुमाह ॥ वकुपुष्फ इत्यादि । वकुपुष्पभरेणावनामितामूमिगताः शाखायस्य स तथाभूतः शृणु वि
ज्ञाप्यं । गोदावरीतरविकट निकुंजमधूक । शनैः क्रमशो गलिष्यसि ॥ एतेन चिरंमयिपवितिसंगमोभवतीति भावः । तस्मै आर्द ।

राम
२२

मधूकपुष्पावयवास्थिकाया असतीत्वं प्रतिपादयन्नागरकांसहचरमाह ॥ ॥णिप्पच्छिमाइत्यादि ॥ ॥निष्पश्चिमानि परिशिष्टा
नि॰ असती दुःखालोकानि तदवचयव्याजलभ्यान्नारसमागमस्य तदपाये दुर्लभत्वात्॰ दुःखहेतुदर्शनानि मधूकपुष्पाणि
चिंतायांवंधोरिवास्थी निरोदनशीलाममुच्छिनोति ॥१०॥ सिरिविलस्सा ॥ अस्थिरस्नेहत्वादभिप्रायामगृह्णतीमभियोज्यांबोध
यितुंनागरकस्तत्परिहारार्थमाह ॥ ॥उहिअअइत्यादि ॥ ॥उज्झितोऽनुतापे॰ मडहं॰ स्वल्पं॰ हे हृदय स्वल्पसरितो जलरयेणापह्रि
यमाणदीर्घदारु यथा स्थानेस्थाने एव चक्रेचक्रएवलगत्केनापि काष्ठाग्निनाधक्ष्यसे॰ तथा त्वमपि प्रवृत्यां लगत्कस्यामपि
सुभगायां लग्नस्तया ज्ञणविरहेणापि धक्ष्यसे। एतेनाभिमतजनाप्राप्त्या ममास्थिरप्रेमत्वेन तु दुर्विदग्धत्वादित्याशयः ॥१२॥
महाएवस्सा ॥ वध्रूर्वक्षूजनेसखीसख्याः सौभाग्यमाह ॥ जोतीअइत्यादि ॥ यस्तस्या अधररागः प्रियतमेन रात्रौ तुष्टासितः रात्रौ
निरंतराधरपानादाश्चर्यं न्याजितः स एव गोसे॰ प्रभाते॰ सपत्नीनयनेषु संक्रांतो दृश्यते ॥ तथा च विधाधरदर्शनेनेर्ष्यारोषरक्तत्वात्स

स॰टी॰
२२
23

पत्नीमयनानामियमुत्सेज्ञा॥१२॥ दामोऽस्मा हालिकवध्वाः पतिस्नेहपरीक्षोपायं दर्शयंती सखी सखीं शिक्षार्थमाह। गोला अड
त्यादि। गोदावरीतटस्थितं प्रेक्ष्य गृहपतिसुतं हालिकस्नुषा· किमर्थं मामवलंबते न वेति जिज्ञासुर्दुःखोत्तरपादपद्याद्गुर्ल्लंबेनव
र्त्मनाऽवतरितुमारब्धा। अथवा कस्याश्चिज्ज्ञिपतिं प्रति हालिकस्नुषायाः स्पर्शलोल्यसूचकः सखीजनेवादोऽयं॥१३॥ समहरस्स
॥ अभिलषितनायकं प्रलोभयितुं तमात्मसौभाग्यं श्रावयन्ती स्वाधीनभर्तृका सखीमाह। वलणोइत्यादि॥ प्रणयकुपिता
यामा नानुनयमगृह्णत्याश्चरणावकाशे पदस्थाने निषण्णस्य तस्या नालपत इति· निर्वचनत्वादनुमितसुप्तस्येति भावः। प्रश्रय
दानार्थं पादांगुष्ठेनावेष्टितस्य कोशस्य हृष्टकर्षणेन सुखं सुखप्रमादादिसूचितं स्मरामः॥१४॥ भमरस्स॥ संकेतस्थाने पथिका
वस्थितिं जारं श्रावयंती कुलटा पार्श्वस्थितं जनमाह॥ ॥फालेइइत्यादि॥ ॥पारयति अच्छभल्लमिव पश्यत ज्ञया मदे वकुल
द्वारे। हे मत्त कालपथिको निर्वाणं पलालाग्निं क्रमस्य पलालज्वारस्फुरस्य पाद्यमानस्यांतरागे लोहिताकारस्य दर्शनादुत्प्रेक्षे

एम
२२

यं ॥ ४५ ॥ कालसाहमम्मा ॥ जनापवादभीतवंधुजनवार्यमाणाभिसाराकुलरातस्तत्या व्योनार्यं मासूयमाहा ॥ इत्येहं वारेइ

त्यादि । इदानीं वारयति जनस्तदामूकभूतः क्व वा गतः उपक्रमे किं वक्तुमक्षमः संनिहितो वा किं नासीत् । येन यदा विषमिव विष

मं दुर्वारप्रसरं सर्वांगघूर्णनशीलं प्रेम जातं । तदा वारयतीति भावः ॥ श्लेषाति स्थिरनूत्नसा । नायिकानुरागं सूचयन्तीह्ती नायकमाह

। कह तमपीत्यादि । कथं त्वदपि त्वया न ज्ञातं यत्क्वचल्यस्वेदार्द्राभिर्वल्कीभिः । उत्तिविडिस्रंठपर्युपरि निवेशनेन कृत्वा हृतेरूपरित्वद्द

र्शनलंपटा पतिता ॥ ४७ ॥ मेहणीयम्मा ॥ ॥ ग्रामासन्नसरस्तीरनिकुंजदत्तसंकेतसमयेन जारेण विप्रलब्धा विमलजलानयनछ

लेनाभ्रमातायामेव रजन्यां तत्रात्मगमनं तं श्रावयन्ती कुलटा मुग्धवधूरिवाह दृष्ट्वाऽद्भुतकथनछलेन पितृभगिनीमाह

कमलाकराणेत्यादि । कमलाकरा न मृदिताः हंसा उड्डायिता न च पि दृष्टस(?)ः । केनापि ग्रामतडागे अभ्रमुत्तानितं दृष्टिमं विमल

जललवप्रतिबिंबत्वात् गगनस्येयमाशंका ॥ ४८ ॥ मित्रं कस्सा ॥ जारस्य वासं घ्रात्वा सविमनस्कां गृहकर्मपराङ्मुखीं वधूं प्रतिष्ठ

श्रूरूपालंभछलेनाह। केण म इत्यादि। केनमनोऽभयममनोरथेनानिःश्वासाशीकृतेन प्रियस्य प्रवासम इत्युल्लापितं। सविकाणी वा
ल सायत्नेयेन वध्वा अंगानि ॥२४॥ वंदसे हरस्या। इंगिताकाररक्षार्थं कुलजायाः सखी गोपीनां कृष्णतारुण्यानुभवाभिव्यंज
क हसितगुम्फिमाह। अज्ञ विड़त्यादि। अज्ञेति शब्दः प्रथमः समासे। द्वितीयः प्रदर्शने। कृष्णस्य वाल्योचितचाञ्चल्यत्वात् अद्यापि वि
लो दामोदर इति। इति जल्पिते यशोदया गोपीभिरनुभूतविविधसुरतविमर्दक्रमे अस्य वचनस्यासंवद्धार्थत्वेन नर्मस्य हेतुत्वात्ह
स्रमुखवेषिताननं यथा स्यात्तथा निभृतं हसितं व्रजवधूभिः ॥२५॥ स्थिरविगाहस्य ॥ कापि मग्ना नमस्तुतिव्याजेन हृदक्षेहानुवृत्त्यर्थं नाय
कमाह। ते विरला इत्यादि। ते विरला इत्यादि ॥ ते विरल इत्यादि ॥ ते विरलास्सुरूपाः येषां स्नेहोऽभिन्नसुखरागः। आदिमध्यां
तेषु तुल्यसुखप्रसादः। अनुदिवसं वर्द्धमानः ऋणमिव पुत्रेषु संक्रामति ॥२६॥ इंदस्स ॥ कापि मुग्धत्वशिक्षार्थं सख्याः कृष्णानुरक्त
गोपीवैदग्ध्यमाह ॥ एन्हि णेत्यादि। नर्त्तनस्नावननिभेन भद्रं स्त्यनीति कर्णे कथनव्याजेन पार्श्वपरिसंस्थिता निकुणगोपीस

गोपीनां कपोलप्रतिमागतं कृष्णं चुंबति । २२॥ राअवम्माणो ॥ कापि कांतगमनप्रतिषेधार्थं वर्षागतमाहात्म्यवन्थ इत्यादि । सर्वत्र दिशां मु

खेषु प्रसृतैरन्योन्यं कटके पर्वतनितंबे लग्नैः कोपमिव मुंचति । विंध्यो मेघैर्विसंवदमानैः । विज्झिणझ्झिः ॥२३॥ कमलस्सा । तथैवाय स्थाया मा

ह । आलोअंतीत्यादि । आलोकयंति पुलिंदाः शबराः पर्वतशिखरस्थिताः क्षितितलनिहिता रनीके धनुषि निषण्णाः । हत्ति कुले रवावि

थ्यं पूर्यमाण नवाभ्रैः ॥२४॥ हलित्यस्सा । कापि प्रोषितभर्तृका मामासयंती सखी पथिकागमयोग्यं वर्षात्ययमाह ॥ ॥वणदवइत्यादि ।

वनदवङ्किङ्गारमलिनांग इत्यनेन दाहाद्वर्त्मनः सुगमता दर्शिता । शोभते विंध्योद्भवैः जलापायाद्धवलैः । नीरदमथनोच्छलितदुग्धस

कोमलध्वमथनदुव ॥२५॥ हालस्सा । कस्मिंश्चित् विषूनिजायाया श्वश्रुः प्रीतिमुपलक्ष्य ऊपितं पतिं बोधयितुं सखी विनापि सुरतेच्छां भवत्य

ववल्लगाइ इति निदर्शयितुमाह ॥ वंदिअइत्यादि । वंद्या निहतबांधवत्वेन विमनसापि वीर इति चौरयुवा । अनुरागेणाहत इत्यत्र गुणकृ

तो नुरागो न तु कामकृतः । अत एवाह । गुणेषु को मत्सरं वहति । दोषदृष्टिर्भवतीत्यर्थः । २६॥ विज्जमराअस्सा ॥ ॥ कोपि गोष्ठ्यामात्मनो वि

ज्ञातेआध्यापतिमरणं ६

स॰री॰ न्नत्वख्यापनार्थमाह॥ ॥उक्तिवद्वडीत्यादि॰ रूपशब्दोऽत्र वपूर्वात्तन्नूणरूपादेशे तसिद्धः॥ रिंछोली पंक्तिः॥ उज्झिप्यते मंडलीमारुतेन वात

मंडल्या॰ ओहांगणो द्वाधस्त्रियासौभाग्यमेव ध्वजस्तस्य पातके वा मतनसुरताशङ्किं कृतदौर्वल्येनाक्रष्टुमशक्यत्वात् कृता व तन्नूण

२५ स्यधनुर्द्धरस्य सूक्ष्मं काष्ठानी पंक्तिः॥ २७ तस्सेअ॥ तथैवापरगाथामाह॥ अन्नं कइत्यादि॥ अद्यक तिति यो दिवसो याम वधूरूपयौवनो

25 न्मत्तासौभाग्यधनुस्तन्नूणाद्धलेन रथ्यासु विकिरति॥ २८॥ तस्सेअ॥ लिंगदर्शनादनुक्रममप्यर्थं तनो जानातीति निदर्शयन्नीसर्वीसर्वी

मिंगितरत्नार्थमाह॥ गअगंडत्थले त्यादि॥ गजानां गंडस्थलनिघर्षणेन मदमलिनाना भित्तौ लोपयोगिफलत्वेन रक्षणीया निःकसं

शाखाभिः॰ कुलगृहादागच्छन्त्यां पुण्यपापशीलविद्धैनैवज्ञायते॰ बुद्धिमाननुक्रम पृहतीत्यर्थः [illegible] अन्यानुरक्तस्य पूर्वं वद्धजमारणसाम

र्थ्याभावात्तन्मरणं ज्ञानं विषयीकृतमितिभावः॥ २९॥ गंधगअस्स॥ कापि जायनादनुत्थितां भ्रातृजायामन्विषन्तं देवरं संपरिहास राम

\- माह॥ अह इत्यादि॰ इयं स्वपितिरत्नसपत्नीजनवेदनाप्रशिथिले रोगेः॥ निर्वर्न्तितन सुरतरसानुवंधेन मानुरागक्षपोनः पुण्येनय २५

त्सुखं तेन निर्भरं यथा भवति वद्धकेलि· लज्जा ह्रीयिनीलं वितलज्जेत्यर्थः॥३०॥माह विक्रमस्य॥ ॥शर्वर्विरियाश्रे मातुश्च निशि ज्ञार्थं ना
गरकः सहचरमाह॥ एवं वक्तु इत्यादिना वधूश्रेमा दुर्बलीकृतः प्रणयं प्रथमगृहिण्या रत्नतु· दुष्परिग्रह्लभशाठ्ये· अभिलषितकुशा
कर्षमपि· नयत्यरण्ये न्वतुर्थाधुः॥३१॥ कस्सकुरस्मा॥ कथमपि सुभगां प्रतिकूपितस्य प्रियस्य मत्प्रतिज्ञं पश्चुनः पुनस्तत्समागमोपे
क्षावचनं तस्य संबंधश्चेत्वितहास्यैकहेतुनामयरातन्महिलासोपालंभमाह॥ ॥हासावि ३ इत्यादि॥ अस्यायमाशयः यथाशपामया
वराक्रिया· प्रथमं प्रसूयमानया प्रमवद्वःखहेतुत्वाद्वल्लभसमागमस्य वल्लभवादेन· वल्लभाभिधानेन· वल्लभस्य नामग्रहणेना
पीतियावत्। अलंममेतिनास्ति अद्यो जनमिति वद्धशोभणं त्वा पुनः प्रियोपगमाल्लोको हासितस्तथा तथापीदं वचनमिति॥३२॥ अ
सुराश्रस्मा॥ अकैतवे प्रियेऽप्यलमलीकप्रमक्तिशंकयेत्याश्वासयंती मातुलानी प्रोषितभर्तृकामनिर्वेदमाह। कइअइ इत्यादि· कैतवरहि
तं प्रेमनास्त्येव मातुलानि मात्रुषे लोके· अथ भवति तद्विरहे को जीवति। यतो मां विहाय गतो मावहमपि तद्विरहेण जीवामीतिभा

वः॥३३॥ रामस्य ॥ नागरकः कामिनीजनमनोहरणार्थमात्मनः कामुकत्वातिशयमाह। अच्छेरमित्यादिना नेत्रोल्लासहेतुत्वादैश्वर्य
मिव। परमसुखहेतुत्वात् निधिमिव। निधी रत्नलाभात्स्वर्गराज्यमिव इंद्रपदप्राप्तिरिव। अतिशयिततृप्तिकारित्वादमृतपानमि
व। आसीदस्माकं तन्मुहूर्ते तस्मिन्नवसरे। विनिवसनदर्शनं। विवस्त्रालोकनं तस्याः॥३४॥ हरिणो॥ ॥आत्मन्यनुरागं सपत्न्या
च विद्वेषमुत्पादयितुं नायिका नायकस्नेहवैचित्र्यमाह॥ ॥मातुज्रू इत्यादि। मातर्वप्रिया त्वमसि मम प्रियः द्वेष्यासि तस्यास्तवा
हं द्वेष्याः बालक नवयौवनतु विताननिन्देति भावः॥ स्फुटं मणामः प्रेमं किल वडूपकारं स्वभावान्यथाभाववद्वडूलमिति॥३॥ अह्
अस्माकं लहांतरिता यानि ष्कारणमानग्रहनिंदाच्छलेन तद्दूती जारस्यागमनावसरमाह। तहेत्यादि। तथा मानोमोक्षनयातथा
एवमेवकारणं विनैव हरमतु वद्धः। यथा तस्या अनुनीय। प्रियएकग्राम एव प्रोषितः॥३६॥ सामिअस्मा गृहगमनाय पथिकः पथि
कतिं त्वरयितुं मन्मथोद्दीपनविभाववचनेन वसन्तस्य दुस्सहतामाह। मडु मामस इत्यादि। मधुमासमाहतेन दक्षिणानिलेना

हते कंपिते॰ मधुकरझंकारपूरिते अरण्ये॰ विरहाग्नि बांधवैर्वहरैणवद्धत्वात्पथिकानां मनोहरं यथा भवति तथा गायति गोपी॥३७
उल्लवइ ण॥ वर्षागमोपक्रम एवागच्छतिल प्रियइ तिसूत्रयंती सखी प्रोषितभर्तृकामसमाश्वासनमाह॥ संदेहि अ इत्यादि
विषागमे गृहाभिमुखमनसा॰ गृहगमनचिंतापरेण पथिकेन॰ पांथः कृ तिपयदिनैरेव लंघनाध्ववशाया त्संवेष्टित इव सं
कलित इव॰ इतो गत्वा ततो गत्वा अथमिति वासकैः परिछिन्नत्वात्खंडखंडकृत इव मममालंबित्वात्यीत इ वेत्यागमनमत्व
रता दर्शिता॥३८॥ पुहइ डीए॥ पत्युर्वैदग्ध्यमात्मनः सौभाग्यं विनयं च सूचयंती स्वाधीनभर्तृका प्रसाधिकामाह॥ ॥अहवं अइ
त्यादि॥ अहं लज्जालुकस्य योन्मत्तराणि उदरानकादिषु करणेष्वपाजपह्वत्तानि प्रेमाणि॥ सखीजनश्च निपुणः किं विचिन्ह
मात्रेण लज्जयति॰ अलाहिशब्दो निवारणे अपगच्छेत्यर्थः॥ किम्पादरागेण॰ उदराद्दिषु पादविक्षोदयहेतुत्वाल्लाक्षारसस्येत्यर्थ
॥३९॥ हालस्मास्सखयाः शिक्षार्थं सखी भर्तृवरितमाह॥ मालोएइत्यादि॥ मालोकएव किंचिदस्तमित एव सूर्ये गृहिणी गृह

स्वामिनोनेच्छतोपि॰ अन्यस्त्रीसमीपगमनप्रतिषेधार्थपर्यायेणाऽसमर्पणएवपादप्रक्षालनादरान्तु॰ हृष्टतः। तस्यहास्येनवि
दिताभिप्रायाहमनेनेतिहसंतीपादौगृहीत्वाप्रक्षालयति॰ एतेनोपायेन धूर्त्तःपतिर्भर्त्सितइतिभावः॥ ४७॥ तस्मैस्त्र्या॥ अन्य
स्त्रीनाम्नाह्वयंतंकान्तंकिंतेहृदि स्थितलमपिक्षीणमितिवदंतीःसखीःखंडितामदिनयोपालंभमाह॥ वाहरउइत्यादि॥ व्या
हरत्तुमांमत्त्वासस्याःगोत्रेण नाम्ना॰ किमन्यभणितेनस्थिरप्रेमाभवत्तुयत्रतत्रापिमा किमन्येनभणता॥ ४८॥ कुसुमराग्रस्त
दुष्टदूतीप्रत्याख्यानार्थंप्रोषितभर्तृकादैवोपालंभच्छलेनपत्युर्वल्लभतातिशयमाह॥ ॥हृदयंइत्यादि॥ तस्यहृदयमङ्गेषुस्थि
तं॰ स्पर्शोऽङ्गेषुस्थितः॰ जल्पितंवचनंकर्णेस्थितं॰ हृदयंहृदयेनिर्मितंवियोजितंकिमत्रदैवेन॰ अयमाशयः॥ तस्यरूपंसुकु
मारत्वंप्रियवचनंसज्ञावचश्चेत्त्रिंचभावयंतीनमांविरहःपीडयतीति॥ ४९॥ चंडमहासेणस्सा॥ प्रोषितभर्तृकायाविषमांविरहा
वस्थांतत्कांतागमनत्वरार्थंसंवादयंतीमसखीतत्समीपगामिनंपथिकमाह॥ ॥सम्मणेइत्यादि॥ ॥शयनेचिंतामयंप्रियंक

त्वा निमीलिताक्ष्या आनंदमुकुलितनेत्रया विरहदौर्बल्यात् प्रशिथिलवलयाभ्यां बाहुभ्यामालोपगूढः स्वशरीरमालिं-
गितः तथा चन्द्रास्यादशमीं दशामारोहति मदनस्तावदेनामनुकंपस्वेति भावः ॥४३॥ उद्बद्धमत्रिणो ॥ कलहांतरितयोर्यूनो-
रनुनयापगतागतखिन्नाद्दूतीनावनुकूलयितुमात्मनिंदामाह ॥ परिहृ इत्यादि ॥ रेषकडुवचनैर्लीप्ष्टे पैश्यपरिभूतेनापि
दिवसमनुदिनं गृहगृहभ्रमणशीलेनान्यकार्यपरप्रयोजनार्थं अत्र कार्यभक्ताशाप्यर्थं च विरजीवितेनष्टहृदे नदीर्घायुषा वा नेन
त्रपितांस्मनुद्वेजितास्माः दुःखाग्निपरीतत्वात् दग्धश्वासो कायश्चेति दग्धकायस्तेन कृष्णातिशयाद्दग्धइव काको दग्धकाकस्तेन
यथा इत्यादिशब्दप्रतिपादितः प्रतीयमानः श्लेषोत्रालंकारः ॥४४॥ विक्रमराज्ञस्माशीतार्त्तपथिकावस्थाकथनच्छलेनानाभियो-
ग्यां प्रतिकोपि वैरंग्यख्यापनार्थमाह ॥ अविरल इत्यादि ॥ अविरलनिर्गतपुलकः प्रकटितकंपः प्रमुक्तसीत्कारः ॥ हेमंते पथिकजनः
सुरतासक्त इव प्रतिभाति ॥४५॥ तस्मै आ दुर्जनसंगपरिहारार्थं कोपि सहचरमाह ॥ वस इत्यादि ॥ वसतिर्यत्रैव खलः पोष्यमाणः संवर्ध्य-

मानः संदीप्यमानश्चम्रेहेन दीनेन स्नेहस्यैतैलादेर्दनिनव·त्तमेवालयमाश्रयभूतं जननं भूभागं वा विरेण मलिनयति सा यथा दं
सांधकारं च करोतीत्यर्थः ॥ ४६ ॥ कश्चित्तिराश्रस्य विश्रामातादानोन्मुखं भुजंगं कञ्चित्कृपणनिंदामाह ॥ ॥ होत्री धिक् इत्यादि ॥ ॥ भवं
व्यपि निष्फलैव धनवृद्धिर्भवति दानरहितस्य। यदुक्तं·दत्तभुक्तफलं धनमिति। कलौ दानस्यैव धर्मत्वात्तदभावे धनं निष्फलमेवे
ति भावः। ग्रीष्मातपसन्तप्तस्य विजनकच्छायेव पथिकस्य ॥ ४७ ॥ कन्द्रोद्दस्सा ॥ प्रोषितभर्तृकास्फुरितवामनेत्रा सपरितोषमाह ॥ ॥
स्फुरिए इत्यादि ॥ स्फुरितवामाक्षि त्वया यद्येष्यति मम प्रियो द्यतन्मु विरं·डाहिणि अमितिष्ट ह्यात्तिप्रश्नाः स्त्रियां वेति विकल्पेन स्त्री
लिंगता। संमील्य दक्षिणमक्षीत्यर्थात्·त्वया च्च विरहक्लेशेन्निष्टेत्वामेवैकं प्रियालोकनेन कृतार्थयिष्यामीत्यर्थः ॥ योहि यदा चर
ति स तत्कर्मफलभाग्भवत्यतस्तत्कर्माचरणीयं·। शकुनादावपि नाशनीतिः कार्येति प्रियतममुखावलोकनेन हे स्फुरितवामन
यन कृतार्थमसि त्वमिति भावः ॥ ४८ ॥ मद्भि त्रिअस्सा ॥ पुनः कापदेशेन कामुकान्तरसंभोगेच्छं कामनुरागं वनापिकाया दर्शयंती

दूतीनायकमाह ॥ ॥सुणह इत्यादि ॥ ॥कुक्कुरप्रचुरे ग्रामे त्वद्दर्शनहेतुनाप्रतिगृहं भ्रमन्ती सा बालापाशकशारिविकदापि खादिष
ते ॥ तद्यावदसौ नवयौवनाकेनविदग्धेन नोपभुज्यते तावदेव भुंक्ष्वेति भावः ॥४९॥ देवराभ्रमस्ता । ध्यं युवानं प्रतिमानुरागा नायिका
तस्याः स्थिरप्रेमतां कथयंती मत्तोऽसौ मत्तो भाग्यगर्वमाह ॥ ॥अलमं हं इत्यादि ॥ अन्यासां कुसुमरसं यत् किल मदइच्छति मधुक
३५ रः पातुं तन्नीरसानां दोषः कुसुमानां नैव भ्रमरस्या ॥ अयमाशयः ॥ यदीच्छानुरूपमेकत्रमधु लभते तदा किं कुसुमांतरमनुसरति नदि
यं तस्यैवं वल्लतामयाश्च तिष्ठत्विति ॥५०॥ अल्पमरामस्याः हासीर थ्यावलोकनहारास्थितस्तनप्रदर्शनैः कलितशीलखंडनरसां कुलव
धूमाह ॥ ॥रच्छापइइ इत्यादि ॥ अथवा रथ्याप्रकीर्णनयनोत्पला ॥ त्वा माप्रतीक्षते आगच्छंतं द्वारनिहिताभ्यां द्वाभ्यामपि मंगलकलशा
भ्यामिव स्तनाभ्यामुपलक्षितेत्यर्थः एतेन मंगलपूर्वकं कृतं कार्यं सिध्यतीति भावः । अथ च ॥ तादृशी वासकसज्जा त्वां प्रतीक्षते तितामा
त्मदर्शनेनानुकंपस्वेतिभावः ॥ भो नायकं प्रतिहस्तक्रि ॥ रथ्याप्रकीर्णनयनोत्पला स्थिता उत्कंपश्य सि । द्वारनिहिताभ्यां मंगलकल

शाभ्यामिवस्तनाभ्यां॥ अयमाशयः॥ नयनोत्पलाभ्यां कृतरथ्याप्रजागद्वारिकूलशाखिवस्तनौ निधाय यस्य वर्त्म प्रतीक्षसे कथयत
मानीयतवद्दामीति॥ ५१॥ हालस्य॥ अगृहीतानुनयविलक्षं पुनरूपसर्पणविमुखं नायकं प्रमेव यतीहूती कुलहांतररितायाः प
श्चात्तापमाह॥ ॥तारुण्यमित्यादि॥ तावदुदितशया वदुद्यते रोदितुं शक्यते तावन्न क्षीणं यावन्न क्षीयतेऽयं॥ तावद्दौर्वल्यं ने भवतीत्याश
यः॥ तावन्निश्वसितं वराक्या यावच्छ्वासा न प्रभवन्ति॥ इदानीं क्षीणायाः श्वसितुमपि न शक्तिरिति ज्ञात्वा तामनुरक्तां त्वदुपेक्षया म्रिय
माणामनुकंपस्वेति भावः॥ ५२॥ वसंतस्य॥ स्थिरस्नेहता सूचनेन नाथिकांतरं रोचयितुं कश्चिदुपरतजाया विरहविधुरमात्मानं मनु
शोचन्नाह॥ ॥समसौख्यइत्यादि॥ जायापती मिथुनं॥ मिथुनैकदेशेपि जायायां पत्यौ वा भयाभिधायक विशेषणपदप्रयोगयोग्य
त्वादत्र मिथुनशब्दः प्रयुक्तः॥ अन्यथा जायेत्युच्यमाने जायैव शोच्येत॥ न तु पतिः॥ पतिरित्युच्यमाने पतिरेवोच्येत न तु जाया॥ तेनायमर्थः॥
समसौख्यदुःखपरिवर्द्धितयोः कालेन रूढप्रेम्णोः मिथुनयोर्द्वयोर्यो म्रियते तन्मिथुनं जाया वा पतिर्वा तत्खलु जीवति॥ इतरस्त्वी वन्मृतं स

वति। अयमाशयः विरहदुःखभाराद्वरं मरणं न पुनर्विरहदुःखदायं जीवितमिति॥५३॥ बंधुवम्मणो। प्रियया समागमन श्रवण विधु
रायाः कुलवध्वा वंधुपुरं प्रीसमागमनमाह॥ हरि हरि इत्यादि। हरिष्यति प्रियस्य नवहृतपल्लवः कश्चिदयमस्मं ज्ञीमनाथः प्रस्थानक
लशमुखंसंस्थितो गमनं। अतो मा रोदीः पुत्री तिर्योन्यां। वसंतागमविकृष्टवदृष्ट्वा नगमिष्यतीत्याशयः॥५४॥ देवदत्तस्य। अन्तुनमा
गोपगतं कांतं दृष्ट्वा कलहांतरितामपरिहासानुगमाह॥ जो कहवीत्यादि॥ यः कथमपि सखीभिर्ममहृदि दुःप्रणयकलहे लब्धप्रवे
शितो हृदये न तु मया रक्षीकृत इत्याशयः। समानश्चोरिका कामुकइव दृष्टे प्रिये नष्टः पलायितः॥५५॥ वालाइवस्य॥ कापि कुमु
भाववयार्थं गतायाः सपत्न्याः शीलखंडनं श्रुत्वा मितिसुवर्यत्याह॥ महि अइत्यादि॥ शशस्तुतं पंचनखव्रणानि सांद्राणि तन्कुक
विद्धमाकुरितिः एवंविधंशशस्तुतं। प्रियेण स्तनकुच्चलाग्रे निहितं दृष्ट्वा सखीभिर्लप्यमाना स्तन केलयं कुसुंभपुष्पमितिसुगंध
वधूका हस्यते। मुग्धवधूकेन पालंभपरं वचनं। प्रियदत्तं नखक्षतमपि न जानातीतिभावः॥५६॥ स्फोटयंतीहृत्ये न हिंपंती न खपदा

निापदा॥कमलाग्रस्म॥कापिमरणमयंदर्शयंती विरज्यमानंनायकमनुकूलयितुमाह॥उन्मूलेनि इत्यादि॥उन्मूलयंतीवेत्यर्थ
ः॥इमानि तवरे॰ विरज्यमानस्यावधीरेणवशेनाविसंस्थुलमवहूलह्रंयथाभवतितथावलनयनाईर्येषुदृष्टा लोकनेषुतानि॰एते
नास्ता विरागो विरागस्तू ननेननावलोकनेनापितवप्रियेलग्नाहमितिभावः॥५७॥विजन्ती तिणिभविरहविधुरत्वंसूचयंतीनायिका
प्रियलदर्शनंकांतमाह॥णमुग्रंतीत्यादि॥नमुंचंति दीर्घश्वासानुन्नतुदंति चिरंनभवंति कृशिताः॥धन्यास्ता यासांबहुवल्लभवल्लभो
नत्वं॰ ग्रस्मामिसुत्वामासाद्यसर्वमिदमनुभूयतइति भावः॥५८॥हालस्स॰॥ ॥शातःप्रस्थितायाःप्रियायाःपरिहृत्यावलोकनंनाय
कःस्वसौभाग्यख्यापनार्थमाह॥णिद्दालइत्यादि॥सुरतजागरानिद्रालसःपरिघूर्णनशील श्चानुरागान्निर्यक्वलदर्द्धतारकालो
कोदर्शनंयेषुतेदृष्टिनिपाताश्चक्षुःप्रपंचाःशशिमुख्याः कामस्यापिदुर्विषहाःधैर्यच्युतिकृतः किंपुनश्चामानुरागाणमितिभावः॥
५९॥सिरिराग्रस्स॥विरंभोपितप्रियागमनंप्रतिनिषुत्याशंसौभाग्यंदृष्टभक्तितांपुनर्विरहभयमनुरागंचात्मनःऊलदाकम

पिशुनानंप्रति हृदयनिषेधच्छलेनाह ॥ त्ती विअ इत्यादि ॥ पाशानामन्योन्यवंधकृतो दुर्मोचो ग्रंथिः ईर्ष्ये लीतिशमिद्धा ॥ तस्य मम वंशे
मणः परस्परानुवंधाद्दुर्मोचो ग्रंथिः प्रेम ढुह्वेली · सा चिरविरहक्षीणतरयाऽत्ती विनशेषया मया कथं कथमपि गमिता · त्यागमिष्यतीति
सत्याशयावंधुजनाभ्यर्थनयाचात्मवधपातकभयाच्चप्रेरितेत्यर्थः ॥ एतेन पूर्वप्रियगमनप्रत्याशात्यागः सौभाग्यं दृढभक्तितावाक
नः कथिता · इदानीं विरम रे दग्धहृदयेति · नाहं दशविरहदाहमनुभूय पुनरन्यत्रानुरज्यसीति सनिर्वेदं संबोधनं ॥ मा रज्यः कुत्रापीत्य
नेन पुनर्भाविनो विरहाद्भयं ॥ अननुरक्तस्य निषेधायोगादनुरागश्च नायकं प्रति दर्शितं ॥ ६ ॥ अथ वह्टंगस्स ॥ ॥ नायकस्यानुरागह
दये हृतीकस्याश्चिहृंतन खञ्जतावलोकन कौतुकमाह ॥ ॥ अगाइ इत्यादि ॥ ॥ वरस्त्रियानवनखक्षतस्य निदर्शनेऽवलोकने गु
रुकयोवनोत्तुंगा प्रतिमा भागमनिजनयनोत्पलाचितं भवति स्तनपृष्ठं ॥ ६२ ॥ केसवरा ग्रस्स ॥ स्त्रीसेवां प्रति विमुखानभिमुखयितुं क
मुकजनं वशोत्साहयितुं निपृष्टार्थ हृतीन मस्कारच्छलेन भगवतो हृषीकेशस्य कामपरतामाह ॥ तेण म इ इत्यादि ॥ रेदुर्विदग्धास्त

स० टी०
२१
31

नमतापस्य वज्रसिलक्ष्मणाग्रं क्वापि दूरायाग्र एवं कौस्तुभेसंक्रांतं। सूर्यमंडले कलंकरहितं शशिमंडलमिव दृश्यते। एतेन काम
स्य परमोपादेयत्वमुक्तं ॥६१॥ निष्कलंकस्मात्। प्रियानुनयार्थं दूती कलहांतरितामाह ॥ ॥ माकुण इत्यादि ॥ ॥ अवकाशदानाम
तिपक्षस्य सपत्नीजनस्य सुखं मा कुरु। अत्रानर्थः प्रियं प्रसादलोभयुक्तं प्रसादाभिलाषिणं। अन्यथा प्रतिगृहीतगुरुकमानेन
पुत्रि दृढत्कांडालादिमानेन राशिरिव क्षीणा भविष्यसि। अनुनयेच्छुरसौ मानी प्रियो न त्वामनुनेष्यतीति भावः ॥ ६२॥ मा अंग
स्म। विरहोत्कंठिताया विरहार्तिं शंजयंती दूती तत्कांतमाह। विरहकरवत्र इत्यादि। आहितेसमासे पूर्वनिपातो नियमः। तेनायम
र्थः। दुःसहेन विरहकरपत्रेण पाट्यमानस्य तस्या हृदयस्य कज्जलमलिनमश्रुप्रमाणसूत्रमिव प्रतिभाति। तदेवं विरहविधुरां
सुदतीमनुकंपस्वेति। अश्रुणः कज्जलमलिनत्वात् अयं प्रोषितभर्तृका। ६३॥ साहिल्लस्म॥। विदग्धनायिकासंगमोत्सुकं युवा
नं दूती निषेधमुखेन रोचयितुमाह॥ ॥ दुलिक्वेवइत्यादि॥ ॥ दुर्विलेपकमेतदपुत्रकेति विश्रामनार्थं संस्नेहं संबोधनं। म

एम
२१

मा हसं हृदयनिक्षेपत्र्यं करिष्यसि। येन हेतुना ऽत्र निहितानि मन्नो हृदयानि न पुनर्लभ्यन्ते॥ एतेन चाटुचातुर्यादिना मनोह
रत्वं सूचितं॥ ८५॥ रा०॥ अस्मे हरस्तानानाथिकायाम्सुरतसुखाद्भुतात् दविलज्जस्य सूनोर्वैमुख्यमाशंकाहतीत स्यास्तु ररततादोषपरि
हारार्थमाह॥ णिसुन्न इत्यादि॥ निर्दृढ्वरतापि वक्षःस्थसुरतावमानस्य स्थितिमजानती अविरत हृदयादन्यदपि किंचिदस्ती
ति चिंतयति॥ एतेन नायके छातु पालनरामो मोग्ध्यं चोक्तं॥ ८६॥ मं०॥ गा० लज्जालमस्य॥ भुजंगजनं रोचयितुं ऊढानीवेश्या प्रेमस्तुतिमाह॥ एं
दं तु इत्यादि॥ सुरतं द्विविधं॥ तद्धि विधं बाह्यमाभ्यंतरं च। तत्र चुंबनालिंगनादिभिर्बाह्यं॥ स्त्रिया पुरुषेणाव नानाकरणैरुपसृष्टके अप्रये
ज्जामाभ्यंतरं। तत्र सुरते सम्भ्रमातिवृद्धापहारिणि यथाभिमतं संपादकानि मकलत्रो कस्योज्ञमम ध्यमाजनस्य वल्लभिमर्गोर्ई सितशु
ष्करुदितचाटुप्रमुखैर्विनिर्मितानि वेश्याश्रीणां प्रेमाणि तिनं दत्तु लाभसत्काराभोजिभवंत्वित्यर्थः॥ हाल स्म॥ ८७॥ दुर्वला पिता सीति हासि
ताप्रियेणोक्ता विरहोत्कंठितानमाह॥ अप्पन्न इत्यादि॥ प्रियापराधजन्मित्रज्ञाभो मन्युः न शामं दुःखं येन सततयाभूतः किमाक्रुश्यायिते ति

मन्तु १

स॰टी॰
३२
32

प्रष्टुमिवाह्यत्वात्स्नेहस्य हसन्त्याप्युहि॰ तावच्चनविज्ञां प्रियं जनं तं त्वत्तस्तवकथयिष्यामीतीदानीं कथ्यते पि न ते प्रत्ययो भविष्यति न
वस्थिरत्वे हेत्वान्तमेयं दर्शेत्याशयः॥८८॥ पवरान्त्रस्या। विरागतं कांतं विरहोत्कंठितासनिर्वेदमाह॥ अथवइत्यादि॥ अत्र धीर्यमत्वीव
चनानि विषयां प्रियाकृतेन कारणेन रमितोस्मि एतानि तानि शीख्यानि संशयो येजीवस्य॥ अस्तु तावदमुरवत्वद्धिरहादिदानींजीवितमेव
संदिग्धमित्याशयः॥८९॥ देवस्मा। अतिविशिष्यालापद्धलेनहूती मधुकनिकुंजं नगामिष्यमितस्यापरहमेवगामिष्यामीतिसंकेतंजा
रमाह॥ ॥इमालुइत्यादि॥ ॥ईर्ष्यालुः पतिस्तस्याराज्ञो मधूकं नदद्यामुखेतुं उ विनोत्यात्मनैवमातः। अत्यन्तुकस्वभावः॥ गृहजारागम
नानाशंकनात॥९०॥ कडूकेसरिणि॥ अभार्याजितकेलिकृतांकांतां धृतवस्त्रांचलं चलादाकृष्य गच्छंतीमनुनयन्नाह॥ अक्षोडि अड्ड
त्यादि॥ वलादाकृष्य वस्त्रैकदेशशस्थिते॰ मं यरंत्व व्रज॰ अस्तु तावन्नमप्रणयभंगः। द्रुतगमनेन स्तनभरोद्यासितस्य मध्यस्यापि भंगोन
चिंतयसि॥९१॥ गुणग्रस्ता। विज्ञत्वज्ञापनार्थं विदग्धः सहचरं पथिकप्रपापालिकयोरन्योन्यानुरागमाह॥ ॥उद्दृष्टो इत्यादि॥ ॥पिपा

राम
३२

सापगामे पिज लपो नच्छले नमुखो व लोकनकुत हत्था हूर्द्धा ह्नः पिबति जलं॰य था यथा जलगलनाय विरलांगुलि श्चिरं पथिकः॰अ
पापालिकापि तदनुरोधान्मुखो लोकनकुतहलार्थं तयातथाधारां तनु कामपि ननूकरोति।७२॥ तस्सेअ्य।भिक्षादानाय निर्ग
तावधूः किमिति विरयतीति स्वसूवव मिसपत्नी भिक्षाचर भिक्षादात्र्योरत्यंतासक्तिमाह॥ भिक्खा अर इत्यादि। भिक्षाचरः प्रेक्षते नाभि
मंडलं सापि भिक्षादात्री तस्य मुखचंद्रं द्वयोरपि करं कंतच्चवडुके भिक्षाभांडं भिक्षादान भांडं वका काविलुंपंति तत्कृतं तंडुलादिकं खा
दयंतीत्यर्थः।७३॥ माभिरा अस्स॰॥ प्रियमनुनेतुं प्ररोचयंती सखी कलहांतरितामाह। जेण विणा इत्यादि। येन विनान जीव्यते न शा
एपतेसो नु नीयते॰ कृतापराधो पि आपे पि नगरदाहे भण कस्य न वल्लभो ग्निः। अग्रयवानाथि केवनाय कांतुनयार्थमिदमाह।७४॥
रो हाइ॥ ॥विदग्धकामुकं रोचयितुं कापि नागरी ग्रामनिंदाछलेनात्मनो वैदग्ध्यं सखीमन निर्वेदमाह॥ ॥वंकं को इत्यादि॥ ॥पाम
रप्रतु रेती च वकुलेहत यमे॰वक्रं कः प्रलोक्यते॰इंगितज्ञ जनाभावेन कटाक्षस्य निष्फलत्वादिति भावः। कस्य कथ्यते सुखं वे ति॥

प्रकृत्रनाद्यनुभवः दुःखं वेति मन्मथोन्माथः केन समं वाहस्यते। परिहासेन दुःखं प्रेर्यत इत्याशयः॥७५॥ मिहणा-ग्रस्स॥ मनोरथ
सिद्धिहेतावपि मनो विकरोतीति निदर्शयन्नागरकः सहचरमाह॥ फल इत्यादि। फलहीवाटकः कार्पासीक्षेत्रं तस्य पुण्याहव्य सु
भद्रणप्रथमकर्षणाय। यन्नांगलं। तत्रमंगलमालेपनादिष्टानंकुर्वन्त्याग्रमन्त्याः मनोरथगर्भिताया स्तत्र कर्पासबाह्यां मयारंतव्य
मिति हृदि च्युतमनोरथायाः हस्तौ थरथरायतः वेपथुभाजौ भवतः॥७६॥ काहिलस्स॥ मत्वीमखाः शिक्षार्थं धूर्तां चरितमाह॥ प
हिइत्यादि। उल्लूरणं छेदनं। पथिकच्छेदनशंकाकुलाभिरसतीभिर्बहलतिमिरस्य। काकविष्टाशंकया पत्रच्छेदस्य वासकग्रह
णस्य च निषेधार्थं। आतपीणेनालेपलेपेन निभृतं वटस्याधिकानि पत्राणि। निधुवनसंकेतस्थानतास्य वटस्य सुप्रसिद्धा अतस्त्वा
तर्पणलेपनेन काकविष्टाशंकया स्य पत्राणि यथा न च्छिद्यंतीति भावः॥७७॥ ग्रहराग्रस्स॥ ॥दंतधावनार्थं संकेतक करंजकुं
जशिखाभंजकमसतीसोपालंभमाह॥ भंजंतस्सेत्यादि॥ भंजतो पि तव स्वर्गगामिनो न दीकरंजशाखाः। भण कथमद्यापि धार्मि

कपाटौ धरणीमिव स्पृशन्तः। कान्त्यैव स्वर्गं जिगमिषुरग्रपादिकया स्थितो दूरस्थशाखाभंगं कुर्वन् कथमपि स्वर्गं न गतोसीति
भावः॥७८॥ हालस्य॥ मृतायामपि जायायां हालिकस्य प्रेम्णः प्रशंसाव्याजेन नायिका नायकं प्रेमानुबंधस्थैर्यार्थमाह॥ ॥णिक्कम्म
इत्यादि। निष्कर्मणो पि ह्वेत्रात्त पामरो नैव व्रजति वसतिं गृहं। मृतया प्रियजायया शून्यीकृतं यद्गृहं तेन दुःखेन तत्परिहरन्। अयमा
शयः। इदृशं तत्प्रेम भवति येन मृतभार्यः पामरो गृहवासादप्यरण्यवासं वहुमन्यत इति॥७९॥ पुंडरीकस्य॥ प्रोषितभर्तृकायाः सखी त
त्कांतसमीपगामिनं पथिकं संदेशमाह॥ ॥फंफा इत्यादि॥ ॥फंफावतो वर्षावातस्य मेनोन्नाणि ते। तृणीकृते गृह विवरप्रगलत्सलि
लस्य धारातः कुड्यलिखिता अवधिदिवसं रक्षतिमहिलाकरतलाभ्याम्। एतेनावधावुत्तीर्णे दुष्करं जीवनं न स्यादिति भावः॥८०॥ जन्यसे
नस्य॥ ॥कुलटायाः संकेतस्थानगमनत्वरार्थं तत्रान्यागमननिषेधार्थं च वहन्ती राजिकापत्रचर्वणान्मर्कटापदेशेन कामार्त्तं नाय
कस्य संकेतस्थानस्थितिमाह॥ ॥गोलाणइ इत्यादि। गोदावरीनद्याः कच्छे चर्वयन् राजिकायाः पत्राणि उत्पततिमर्कटः खो केव ए

स॰टी॰ ३४ 34

इ॰ का शते॰ पो हं उदरं च पिठेइ॰ आ हं तीत्यर्थः॥ एतेन स्तुष्कुर्मुहू उदस्त्रिकथ्यत्वं पशंपत्त्वयि विलंबमानायां कामार्त्तिनारयत्र स्तीति
भावः॥ अथवा॰ अदृष्टकृत्यादाव विचार्य प्रवर्त्तमानानां अवश्यमनुतापमनुभवंत्यतस्तु विचार्य प्रवर्त्तितव्यं॰ कर्मठस्य चपत्रमङ्गण
संभावनायां संभाव्यमानं त्वभिचारमपङ्कोतीति भावः॥ ८१॥ एरवाहणस्स॥ ॥पूर्वं सुभगायाः सखी तदलंकारेणान्यामसमानां
मेलयित्तुमिच्छो स्तत्कांतस्यात्तेपार्थं स्वभर्त्तुः स्नेहो विततविधिस्थैर्यमाह॥ ॥गहवइ इत्यादि॥ ॥हंडुआ॰ गुरुतवेरा॰ गृहपतिना श्
तमैरिभस्य हृह हुंटाद्वितं दामविरमृह्वातत्सहशापरमहिषालंकरणार्थं च वर्गशतान्यनेकमहिषमृध्यानि नीत्वा तदप्राप्या॰ ए
वृरिश्च नंतरं॰ आर्या गृहे चंडिकायतने वद्धं। एतेन मम भर्त्ता मृतस्य महिषपशोरपि स्नेहवशेनैवं कृतं त्वत्तु जीवंत्यामेव प्रियभार्या
यां तदलंकारेणान्यामतदनुरूपामेवालंकर्तुमिच्छसीति॰ नितडुचितमिति भावः॥ ८२॥ मञ्चसामिणो॥ सपत्नीसंपदुत्कर्षो द्वि
ग्राममभिनवसुभगां मखीमात्वयंतीमखीविभवादपि मोभाग्यं गरीयइतिप्रदर्शयंत्याह॥ ॥सिहिइत्यादि॥ ॥पेहुणं पिछं॰ ग

एम
३४

त्र भुक्त्वा गृहीतश्रमाध्वनीनां संपन्नीनां मध्ये मयूरपिच्छावतंसा ग्राम्यवधूका गर्वितेति । येन यूयं करिवराहत्वात् तं भुक्त्वा फलै
: श्रमाध्विताः स एवेदानीमतस्त्वंभोगातिश्रमक्लिन्नाणां मयूरमात्रमारणाद्धमः संवृत्त इति सौभाग्येन ज्ञातगर्वा भ्रमति ॥ ८३ ॥ वोडिम्भ(
स्म ॥ वेश्यामाता भुजंगप्रोत्साहनार्थमाह ॥ वक्रञ्छि इत्यादि । कराग्रप्रेक्षणशीलानां । साभिप्रायवचनप्रयुक्तिशीलानां । विभ्रम
भंगुरभ्रमणशीलानां । विभ्रमभंगुरभ्रमणशीलानां गणिकाङ्गनानामित्यर्थात् । हे पुत्रक पुण्यैर्जनः प्रियो भवति । धन्यस्त्व
मसि येनैवंविधापि मम दुहिता त्वां प्रत्येव मनुरक्तेति भावः ॥ अथवा कथमपि वेश्यानुरक्तम्प्रतिकस्याश्चिन्निषेधवादोयं ॥ ८४ ॥
दप्पसामिणो ॥ ॥ असती विजने गोदावरीतीरलतागृहे धानाय वस्थित्या संकेतविघ्नकारिणं धार्मिकमाह ॥ ॥ भम धम्मिअ इत्यादि
। धार्मिक भ्रम विश्वस्तः स कुक्कुरोऽद्य मारितस्तेन गोदावरीतटविकटलतागृहवासिना सदृप्तसिंहेन । अत्र भ्रमेति विधिरूपोऽर्थो वाच्ये
ध्वनिना लतागृहे सिंहसंचारसूचनेन तत्रागमननिषेधस्य प्रतीयमानत्वाद्ध्वनिरलंकारः ॥ ८५ ॥ पोहिमस्सा ॥ ॥ विदिताभिप्रायो

स॰टी॰ सिमयेतिरोषयन्कश्चित्परिहासशीलःकमपियुवानमाह॥ ॥वाएरिइन्याटि॥ ॥वातशेरितेनकर्णावतंसीकृतोत्पलरजसाभृतं

३५ मेचक्षुरिति॰ अपदिशन्यास्तद्द्नोपनयनार्थमन्विरूकुर्वन्स्कृत्कारयातेनैवात्रसंतुंबनः॰ तदवलोकनकौतुकेनानिमिषनयन

35 त्वादेवंविधपुण्यफलभागित्वाच्चकोसि देवानांकतमोदेवस्त्वं॰ प्रसिद्धास्तावद्येदेवास्तेपिनैवंविधपुण्यफलभागिनइतिभाव

ः॥८६॥पाणिन्नस्स॥ ॥कांतानयनन्यवार्थमदनाग्निमभिनयन्तीप्रोषितभर्तृकामखीमाह॥ ॥महिइत्यादि॥ ॥सखिद्यथयंतिक

दंबकानियथामांतथानशेषकुसुमानि॥ नूनमेषुदिवसेषुवहतिगुलिकाधनुःकामः॰ वर्षासुगुलिकाधनुःकामः॰ वर्षासुगुलि

काकारेणकदंबकुसुमेनकुसुमान्तरेभ्योमांतापयतीसुतरांजा॥ ॥८७॥ लच्छीए॥ ॥विरहोत्कंठितायाःसखीवधपातकाभयात्कृपयेनि

तत्कौतेनतदुपगमार्थमाह॥ ॥णाहंहइत्यादि॥ ॥नाहंहतेतित्वंप्रियःक्षस्महवनाग्रहणाज्ञवयंप्रियाइतिभावः॥ इत्यतोहेतोःकोऽस्मा राम

कमत्रव्यापारः॥ प्रियत्वान्नैवतदनुकंपनमित्याशयः॥ सापुनर्म्रियतेतवविरहेण॰ नवचस्त्रीविधादपयशइति॰ तेनधर्मोन्नरस्तुभय ३५

हितं धर्महेतुं संदिग्धमिव भ्रमणाम:॥८८॥तिक्रमस्मा॥ प्रियेकिं मामनपराधं त्यजसीति विदग्धं कृतचरणपातमनुनयंतं कांतं व्यलिकितासु
वत्यंतरललाटिकालिंगनसूचकं चिह्नं दर्शयंती सोपालंभमाह॥ तीक्ष्ण इत्यादि। तस्या मुखात्तद्वमुखं तद्वमुखादपि मम चरणे॥
हस्ताहस्तीव हस्तेन संक्रमादिवागत: लाघवातिशयशीलतादतिदुष्करकारस्तिलकइति तिलकोपालंभच्छलेन युवत्यंतरसंग
चिह्नमाविष्कृतं॥८९॥ हालम्मा इयमस्मिन्ननुरक्तेति नागरक: सहचरमवगमय्यन्नाह॥ सामाइ इत्यादि॥ संकेतस्थाने गमन
सूचकेन जंहूपत्रेण कृतावतंसश्यामो भ्रमणशील इति तथा स्ते हलिकपुत्रे सति निह्नवार्थमहो ह्रि प्रह्नि एपा: श्यामा या: संके
ति तस समय लेखन वैलक्ष्येन खिद्दे नवमुखशोभा स्यामलायते। स्वयमेव मलिना भवतीत्यर्थ:॥९०॥ अविरलग्रस्ता॥ कलहांतरि
ताकांतानुनयाय हतीमाह॥ हृदये इत्यादि हृतीत्वमेव कुशला कर्कशमृदुकानिजानामिव तत्कुं। कंडूतिपांडुरं यथा न भवति तथा
त्वं करिष्यसि। यथा कंडूयनकौशलेन कंडू: शाम्यति। वैद्रूप्यं च न भवति तथा त्वमपि मृदुकटुकेन वचसैष्यसि। यथासौ नोद्विजते मां

स॰टी॰
३६
36

चमज्जत इत्याशयः॥९२॥ आउवसन्निणो॥ हृतीकमपि विदग्धं कस्याश्चिदनुरागमाह॥ ॥महिलाइत्यादि॥ ॥महिलासहस्रभ
रितेतवहृदये सुभगस्थानमलभमाना दिवसं अनन्यकर्माऽङ्गं तनुकमपि तनुकं करोति। अतिदिने त्वत्समागमोपायचिंतया
क्षीयत इत्यर्थः॥९३॥ विअडइसेणसा॥ कापि प्रत्यन्नहृष्टापराधपरिहारोचितप्रस्तुतरङ्कशलं सखीसवङ्कमानमाह॥ ॥वकले
इत्यादि॥ च्युत्वेयकाणिअतिवादिवचनास्कंदकानि प्रियजल्पितानि मंप्रत्ययोन्यादनकोशलात्परहृदयनिर्हृतिकराणि
चिरलः खलुजानाति जनः सहसापराधेन तु मन्ये जल्पितया न्यभिधातव्यानि त्वमेव परमीदृशानि प्रियवचनानि वक्तुं जानासी
तिभावः॥९३॥ तस्मेच्या॥ कोपिप्रियां प्रत्यनुरागातिशयं सूचयंस्तत्सखीमाह॥ खणमेत्तं इत्यादि॥ क्षणमात्रमपि नायाति
अनुदिवसं विनीर्णोदन्तो गुरुकः संतापा विरहकृतः पक्षे। अनुस्मरणेकृतश्च पयसो तथा प्रच्छन्नपापशंकेव शणमलीमसहृ
दयान॥९४॥ वम्हआरिणो॥ ॥कापिसुशीलाकृतापराधमनुनयंतंसविनयरोषमाह॥ अत्तुअइत्यादि॥ हेअयजनाहंकु

एम
३६

पित्ता॰तु पत्यूहत्या लिंगा किंतु धामांप्रसादयसि । तव मन्तुः स्मृतस्यात् केन॰ प्रणयरोषेणापि अस्मन्नभिज्ञे स्यामि मिमानो निष्फल इति भावः॥ नका
र्या॥ ९५॥ मिश्रंकुसुमा॥ संकेतितकूदतीरलतागृहमहं गतात्वं तु नगतइति प्रतिपादयंती मध्याङ्का भिसारिका जारं प्रति सत्यपि कोपे
हृदयस्य स्थिरस्नेहतां मज्जनहृदयप्रशंसाछलेनाह॥ मरणइत्यादि॥ शरदि महाह्रदानां मंतःशीतानि वहिरुष्णानि जातानि कुंपितस्य
ज्ञनहृदयसहस्राणि मसलिलानि॥ ९६॥ वियाहराग्रस्मा॥ ॥ विरहोत्कंठिता प्राप्तः सखीतत्कांतमाह॥ दीर्घएहइत्यादि॥ दीर्घोष्णप्रचुरनि
श्वासप्रततमोदाप्यसलिलपरिषिक्तः साध्ययत्याग्रिपानीयसामसवलंत्रतविशेषः॥ यत्राग्नौ प्रविश्य जले प्रविश्यते ब्रतमिवतस्याधरविये
गे॰॥ ९७॥ कुसुमस्य॥ कस्याश्चिन्मौग्ध्यवर्णनछलेन प्रथमाभिसारस्वीकारमाह॥ ॥ आग्रस्तइत्यादि॥ ॥ आगतस्य किंतु करिष्यामि
किंवक्ष्यामि॰ कथंतु भविष्यतीदमभिसरणसाहसमिति प्रथमसाहसकारिकाया हृदयं थरहरायते भयेन कंपते॥ ९८॥ समहरस्य॥
उत्कंठिता विनोदार्थं कलहांतरिता कान्तःसहचरमाह॥ आश्वेवइत्यादि॥ प्रणयरोषादानाम्रांतः कपोलां प्रवलिताझरजन्यनशीलांसु

स॰टी॰ ३७

37

रदोषीमास्स ग्रोतिमरोषं सम पमरङ्गी प्रियांस्मरणमः॥ पङ्गीमिति भावः॥९९॥ तस्मेञ्चा कस्याश्चिद् विता या गणिका याधुङ्गंज्ञ नेन क्रियमा
णो ज्ञा बाम सहमानानिजगुणगर्वमभिव्यंजयंती काचिदाह॥ ॥विरिडिंपी त्यादि॥ ॥विरिडिंपि स्मिद्धिरस्तु देशीयः शब्दः॥ फलं कमवि
नजा नत्तो लो काः लोकैर्गता ऽगुप्ति कत यागौरवेणाय द्वारजस्वलां वला न्निवांरश्याहिंताः सुवर्णकारतुलाइव निरक्षरा ग्रपि॰ पङ्केनिर्विदग्धा
ग्रपि॰ पङ्केनिर्विदग्धा ग्रपि स्कंधेवहंते॥ सादरं नीयन्त इत्यर्थः॥१००॥ परिग्राणम्स॥२००॥ ॥इति सप्तशतके द्वितीयाशतकविवरणं॥॥
रसिजनहृदयदयिते कविवत्सलप्रमुखसुकवि निर्मिते॰ सप्तशतके समाप्तं द्वितीयं गाथाशतकमेतत्॥२॥ कापि कामिनी मानग्रहण
र्थं शिक्षयंती वंधुपुरंध्रीमाह॥ केली ग्रइत्यादि॥ केल्याः परिहासेनापि रोषः कर्तुं न शक्यते॥ तस्मिन्नच्युत विनयेरति लोल्यं लंघितावि
नज्ञे या चित के शिवाभ्यर्थ्यानीतेरिवपभिरवशैरस्वाधीनैः॥ ग्रथवा तस्यैव वाडुचातुर्येण याचितेरिवा वशैर्हीनैःएप परतंत्रैरंगैः॥ य
ल्पिवाढुं न शक्यते न तत्कर्मावरणीयं॰ येन विना न जीव्यते तस्मिन्कृतापराधे विरोधोन कर्तव्यस्तथा चातिशयितः कान्ते प्रणयातिशयस्स

राम ३७

चितइति भावः ॥१॥ रोहाए ॥ विदग्धा तु रंजनार्थं वैदग्ध्यं ख्यापयंती काचिदुत्फेल्लिकया क्रीडंती बालां वारयन्त्याह ॥ ॥ उप्फुल्लिआइ इ
त्यादि ॥ उत्कुत्तकपादोपविष्टानामुद्धृत्यपतनोत्पतनरूपा क्रीडोत्फुल्लिका ऋदाफुथिके ति यस्याः प्रसिद्धिः ॥ तत्र श्चायमर्थः ॥ उत्फुल्ल
कया खेलंती नित्तिं नो वारयत न भवतु परीक्षामेयं ॥ प्रेमेण जितश्वासा हृशमध्यावमवलित्याशयः ॥ मा जनभारयुवीपुरुषायितं विपरीतके
लिं कुर्वती ज्ञाता भविष्यति ॥५॥ वच्छस्स ॥ कुलजायाः शीलखंडनविलज्ञाया श्चित्तसंमार्जनार्थं तन्यत्नपातिनी काचिदाह ॥ पउर
इत्यादि ॥ प्रचुरयुवा ग्रामो मधुमासो यौवनं पतिर्वृद्धः ॥ जीर्णसुरा स्वाधीना तदेवमप्रतीकारदारुणेषु विनाशकारणेषु सत्स्वसतीमा त्वं
भवतु किं प्रियतां ॥ तद्दलं परवेदनानभिज्ञस्य जनस्येनां प्रत्यवमर्शपादेनेति भावः ॥६॥ हालस्स ॥ हृतीकस्य चिद्दूतो मनोहरणार्थमा
ह ॥ वङ्कसोवि कहिज्जंतमित्यादि ॥ वङ्कशोपि कथ्यमानं नववचनं मम हृत्संदिष्टं मम हरिणा संचारितं पुनः पुनः श्रवणानुरागात्त्रक्र
तमिति जल्पंती पुनरुक्तशतं करोति योविज्ञ ॥७॥ सुरहिग्गच्छस्स ॥ ॥ हृतीकुलजायाः कमपि युवानं प्रत्यनुरागं संवरणकौशलं चाह

।। पञ्च डिम्ब इत्यादि । शकटिकाशैहमड्डाव निर्भरं तथा यथा त्वं दृष्टः ॥ संवरणव्याप्टतया तस्य छादनव्यग्रया अन्योऽपि जनस्तथैव दृष्ट इति यो
ज्यं । ५ ।। मणिरा अस्मा ॥ पुत्रस्य दंतोद्गमकथनच्छलेन भार्यायाः भोगसुखानुभवसमयशास्त्रिमाह ॥ ॥ गिण्हइ इत्यादि ॥ ॥ गृहीतश्लो
कयत इदं विकसितवदना पत्युरर्पयति ॥ जाया सुतप्रथमोद्भिन्नदंतयुगलांकितं वदरं कोलिफलं अयज्ञावः । बालापत्याया दृष्टविरो
धं परिहरंत्यपतिं प्रति शुत्रस्यपौरत्वं बोधयंती अनुत्रैच्यर्थतां नेयइतित्रापयतीति । पुत्रपालनादपि तु रतसुखं गरीय इति वा । अथवा
उपभुक्तवदरफलमिव रमणीयं मम यौवनं माविफलीकुरु । अथवा । स्वयमेव कोलिफले दत्तं संपाद्य । पुत्रेणदत्तमिति मिथ्यैव
दर्शितवती । प्रहसितवदनेत्यनेन न छद्मते । यद्वा । पत्युरन्तरं निराशास्या पत्या यांन कोपि सांग्रहो भवतीति तमेव प्रार्थितवतीति सहृदयाः
। ६ ।। हरिंहस्सा ॥ ॥ मिथ्याजनो वदतीत्युत्तुनयन्तं कान्तं मानिनी सप्रणयरोषमाह तमेव प्रार्थितवतीति सहृदयाः । अच्छउ इत्यादि
। मां प्रति मंदस्नेहोसीत्यलुतावज्जनवादः हृदयमेवात्मनस्तव प्रमाणं । आत्महृदयेनैव त्वं जानासीत्यर्थः । तथा त्वमपि मंदस्नेहो

यथानोपालंभयोग्योसिप्रियोहिदाक्षिण्येनोपालंभंसहते·त्वंतुनतथेतिभावः॥७॥एहवस्मा॥सहृदयोपालंभच्छलेनऊनदाययथा
भिनकांतामाशंसिंसूचयंतीकमपियुवानंरोचयितुमाह॥अप्पच्छन्दइत्यादि·स्वेच्छाचारित्वसूचनार्थंआत्मच्छन्दप्रधावनशीलेतिसंबो
धनं·दुर्लभस्यसुरतसुखस्यलंभःप्राप्तिर्यस्मात्तज्जनंविमार्गायत्तात्त्विष्यन्·आकाशपथेश्रिरवलंबनमार्गेभ्रमन्हेहृदयकदापिभङ्क्ष्यसि
।अपिशङ्कःसंभावनायांकस्मिन्कालेभंगंशाश्वसिकःखलुसुभगोधावन्भंगंतंकरिष्यतीत्यर्थः॥८॥पवरसेणस्मा।गुणाभिमानि
नीकांचिदस्कृतावदन्यन्कधनमस्माकंगुणानपिनबहुमन्यतइत्युक्तासोद्वेगाकांतसहचरमाह॥अहवगुणइत्यादि।अथवागु
णएवलब्धःपरिभवस्मयः।अथवागुणज्ञोनममलोकः।समेपतिः।अथवाअस्मिन्निर्गुणएवाअन्योजनोबहुगुणवान्·न्याप्रिया
तस्या।येनमांनबहुमन्यतइत्याशयः॥९॥वंहदरिस्सा॥कमपियुवानंपतिजातमन्मथोन्माथाकुलजाकिमिस्तुद्वेगकारणंनक
थयसीतिमातुलान्यापृष्टातामाह।ऊदंतेणइत्यादि।निर्दरणदुःखनिर्वेदनेस्फुरतापिहृदयेनमातुलानिकथंदुःखंनिवेद्य

तितस्मिन्‌ दर्पणे अद्दाए॰ आदर्शे निलंगादेशी प्रतिबिंबमिव यस्मिन्‌ तुः एवं न संक्रामति॥१०॥ राअवम्मणो॥ प्रयत्नमाधिनामपियुवती
विमुखीकारितया नोपगछन्तं नायकमुत्साहयितुं दूती सोपालंभमन्यापदेशेनाह॥ पामासं इत्यादि॥ पाशाशंकीकाकोनेछतिद
त्तमपि पथिकगृहिण्या अपहस्तादधोमुखीकृतात्करतलाद्गलितस्य वलयस्य मध्यस्थितपिंडं भग्नगोलकं। त्वमप्येनां भयकल्य
नया भयादीयमानामपि तां परिहरसीति भावः॥११॥ मोइअस्सा॥ प्रोषितभर्तृकाया सखीतत्कांतस्यागमनत्वरार्थं तद्वृत्तांतमा
ह॥ अेहिदिव इत्यादि॥ अवधिदिवसाधिगमाशंके नशीलाभिः सखीभिस्तस्यालिखनशीलायाः हितास्तत्रैवाग्रे दिवसेऽक(
द्यलिखिताः तारेखाः प्रोंछ्यंते॰ अवधिदिने पित्वयि नागछति नूनमियं प्राणान्‌ परिजह्यादिति भावः॥१२॥ तस्से अ॥ ज्योत्स्नायां प्रि
यया सह विहरन्‌ संपूर्णमंडलं चंद्रमवलोक्य नायकः प्रियामुखप्रशंसार्थमाह॥ तुह मुह इत्यादि॥ तव मुखसादृश्यं न लभत इति सं
पूर्णमंडलो विधिना अन्यमयमपिवान्यथाप्रकारमिव घटयितुं पुनरपि खंड्यते मृगांकः॥१३॥ सच्चहत्यस्स॥ कांचित्तस्थानं कृत्वापि

तस्य नायकस्य गमननिषेधार्थं सखी तत्प्रियायाः वृत्तान्तमाह ॥ ॥ अज्जंगइत्यादि ॥ ॥ अद्यगतोऽद्यगतोऽद्यगत इति गणनशीलया प्र
थम एव दिवसार्धे कुड्ये रेखाभिश्चित्रितं । रेखाभिर्गृहभित्तिः पूरिताः तदेवं त्वद्विरहविक्लवां तां विहाय गंतुं नोचितमिति भावः ॥ १४ ॥
पवरसेण ॥ प्रथमसमागमदिनांतरेऽलज्जान्वयायाः प्रियायाः वैमुख्यमाशंकमानं सहचरं सहचरमाह ॥ ण वित्त इत्यादि ॥ नापि
तथा प्रथमसमागमे यत्सुरतसुखं तस्मिन्नासीदपि परितोषः यथा द्वितीयदिवससविलज्जलज्जिते दिनान्तरे शृंगारव्यभिचारिभावे
न नलज्जयावनते दृष्टे वदनकमले परितोषः ॥ १५ ॥ मंडसन्निणो ॥ ॥ अपि सत्यं कुसुममया बाणा मन्मथस्येति मिथः सख्याः प्रश्नः स
खीसवैदग्ध्यं तामाह ॥ जे समुहा इत्यादि ॥ ये सन्मुखागतेन व्यतिक्रम्य गच्छता परिहृतेन प्रियेण त्वमवशेति मिथः सख्याः सख्याः
प्रेषिता अक्षिविक्षोभा लीलातरलकटाक्षाः अस्माकं ते मदनशरा जनस्य ये भवंति ते भवंतु ॥ १६ ॥ माहवराअस्स ॥ कामपि रमणीं
प्रति साभिलाषो युवा सपरितोषमाह ॥ ॥ इअ रोए इत्यादि ॥ ॥ इतरदिव्यकनकमयसंबलारवज्ञतो जननस्तवजघनारोहणपूर्वके

तस्माद् विचारितएव रमणीयः परस्त्री संबंध इति भावः॥६

एषांगमेन यत्सुखं तन्न प्राप्नोति। अनुभवतीति कनकडोरीकृत वहवरुणयोगं माहात्म्यं मुद्रूरग्रीमुद्रूर्जलप्रवेशस्य फलमित्यर्थः॥१७॥
अंगणस्म। नागरकः कस्याश्चिदनुरंजनार्थं चाटुमाह॥ जीवनस्मेत्यादि। यो यस्य विभवसारस्तं स ददातीति किमत्राश्चर्यं· अभवद
विपन्नवना स्तित्तदपि दत्तं दौर्भाग्येत्वयासपत्नीनां॥१८॥ अद्रुमरिणो॥ उत्कंठाविनोदार्थं प्रियां स्मरन्नूकश्चित्सहचरमाह॥ चंदसा
रिसं इत्यादि। चंद्रसदृशं मुखं तस्याः सदृशो अमृतस्य मुखरसलस्याः सकचग्रहरभसोज्वलचुंबनं कस्य सदृशं तस्याः॥१९॥ तस्मै अ
हूती विमृष्यकारिणं नायकमुत्साहयितुमाह॥ उप्पसइत्यादि। उत्पन्नार्थे सिद्धाभिलषिते कार्ये अतिचिंतयंन्नगुणा गुणान्नगुण
दोषांस्तस्मिन्नति विचारस्तूल्मपेक्षित्वेन प्रवृत्तो हंतिकार्यं॥२०॥ माणधणस्म। प्रणयकुपितं कांतमनुनयंती कापि सस्नेहमाह॥
वालअ इत्यादि·॥ हे बालक·न तरुणविशेषानभिज्ञेति भावः॥ त्वन्नो धिकं निजमेव वल्लभं मम जीवितं तत्त्वया विना न भवतीति ते नकु
पितं प्रसादयामि॥२१॥ हालस्म॥ पादपतितमश्रुबिंदुपातजातपुलकघ्नतीत प्रेमसद्भावमालिंग्योत्यायमिथ्यापरवचनहृष्ट

तवि चिन्तया मया वेदितोसीति वदंती प्रियां प्रियः पुनरपि खलवचनेन प्रत्येष्यसीति काकूक्त्यादि धिमुखेन निषेधयन्नाह ॥ प
न्ति ग्रह इत्यादि । प्रतीहि प्रत्ययं कुर्विति सशिरश्चालनं काकूक्त्या खलवचवश्रम्भात् अन्यदापि न करिष्यसीत्यर्थः । एतदेव द्रढयन्नाह । ए
पन्ति ग्रंतीति · प्रत्ययं ना करिष्य एवं त्वं · तवरोदनशीलाया इमे वाष्पविंदवो मम शष्पस्य पुलकोद्भेदेन पदि भिन्ना नाभविष्यत्वा आश्रय-
माशयः । खलवचनेन न ते मम स्नेहसद्भावभाजि वक्षसि प्रत्ययो नाभूत् एवं स्याद्यादि पादपतितस्य प्रेमसद्भावसूचकस्त्व यावाष्पबिं-
दुस्पर्शः कृतः शष्पपुलकोद्गमो न दृष्टः स्यादिति ॥ २१ ॥ पवरसेणस्ना ॥ असाध्यमपि साध्यते मित्रेणेत्यतस्तदुपार्जनशिक्षार्थं नाग
रकः सहचरमाह ॥ तं मित्तं इत्यादि । तन्मित्रं कर्तव्यं यत्किल व्यसने देशे काले भित्त्यां लिखितं पुत्तलमिव न पराङ्मुखं स्थितं वेसु
ख्यं नाचरतीति भावः ॥ २२ ॥ पालित्तस्स ॥ निभृततमपि क्षुन्नाः कालयंतीति वित्त त्वरया पयन्नागरकः सहचरमाह ॥ वङ्कच्छाइत्यादि ।
वक्षुकाया नदीतीरलतागृहे प्रच्छन्नोद्भूतशील विलसितदर्शनमलज्जमिवोड्डीयते विहंगकुलं · उड्डयनं वशात्मशङ्केः पक्षिहीं(

स॰टि॰
४१

हाभणादिवः। एतेन तिर्यग्वीचीविड्डस्वरितं गार्हयन्ती त्येतद्विदर्शितः॥२४॥ अहराग्रस्य॥ कापि कमपि युवानं श्रितं सख्या जनमनुराग-
माह॥ सव्रीडमित्यादि। त्वं भणामि बालकनास्त्यसाध्यं वसंतमासस्य। गंधेनकुरवकमासानां समागतानां स्मयसमतीत्वं नगानां सव-
लितमेव मनोमे। किंतवेङ्गितानभिज्ञत्वेन शीलं खण्डितमितिभावः॥२५॥ देवराग्रस्य॥ इतीनायकेनायिकानुरागमाह॥ एकत्रैक-
मइत्यादि। एकैकस्मिन्नूहृतवेष्टनकस्य विवरान्तरेण रलंद्वत्तं नयनं ययासा तथा। त्वयि द्युतिकामतिबालकभावानभिज्ञपंजरश्च-
कुनायितं तया। यथापंजरबद्धः पक्षी प्रतिविवरं दत्तदृष्टिर्भ्रमति तथा तयापि त्वद्दर्शनलालसया भ्रान्तमित्यर्थः॥२६॥ इतीनाय-
कायनायिकायादर्शनकौतुकातिशयमाह॥ ॥ता किं करेउ इत्यादि॥ ॥तत्किं करोतु यदित्वमसितया दृतिवेष्टेरितस्तनया(
पादांगुष्ठाक्षिप्तनिःसहांग्या पीतदृष्टः॥२७॥ ॥वम्हआहारिणो॥ ॥प्रियस्मरणहेतावुद्दीपितमन्मथे पथिकः प्रियगृहिणीव-
त्मनुस्मरन्नाह॥ पिअसंइत्यादि। प्रियसंस्मरणप्रगलद्बाष्पधारापातभीतया दीयते वक्रग्रीवया दीपकः पथिकजायया॥२८॥

रम
४१

तस्मै श्रु॥ कमपि युवानमनुरंजयितुं दूती कस्याश्चित्स्नेहदैन्यसूचकं परिहस्यालोकनमाह॥ ॥तदि इत्यादि॥ ॥त्वयि च तिक्राम निवा
लकतस्याः श्रुगा नितयानुवलितानि॰ परिहृतानि॰ यथाहृष्टमध्येनिपतंत्यो बाष्पधारा दृश्यन्ते॥ २८॥ हालस्य॥ काचित्प्रियतम
विरहासहत्वमन्यापदेशेनाह॥ तामजि मोह इत्यादि॥ तन्मस्मान्यध्वमे एव वारं ऽर्जनप्रजनाभ्यां द्वाभ्यामपयेन मे कार्यमित्यर्थः॥
यथाहृष्टस्तपतिरखलस्तथैव भुजनोऽहृश्यमानः॥ एते नमध्वमभ्रे हृष्ट एव वारं॰ नतु तन्नणमप्यदर्शनेन दुःखयन्तु प्रियतमसद्गि भावः॥ ३०॥
तस्मै श्रु॥ काचिदात्मनः पतिं शितिमाभिलाषं कामपि संपर्ण्यमाह॥ ॥अद्वृह्चि इत्यादि॥ ॥अद्य गोतृशेलितं कथयामा हृष्टेमा कुरु॰ स्वाभावि
कं यथा भवति तथा प्रलोकय॰ एवं कृते सोपि सुदृष्टो भविष्यति त्वमपि सुश्लाघाकलिष्यसे॥ ३१॥ मयूरचूडस्य॥ कश्चित्प्रोषितः कुलपा
लिकां निजगृहिणीमनुस्मरन्नाह॥ ॥दिश्च इहं इत्यादि॥ ॥खेदुच्छ्रि आरोपसूचका॰ देशीयः शब्दः॥ दिवसे॰ प्रतिदिनं रोपसूचकायास्तस्याः
कृत्वागृहद्वारापारं गुरुकेपि मन्तु दुःखितास्सरामः पादांतयुमस्य॥ ३२॥ चिह्नमस्ता॥ कमप्युपराक्रंषि निमृकायास्तस्याः कृत्वागृहद्वारा

स॰ टि॰
४२

कं मध्यमस्त्री संगदोषेण परिहरन्तीं दृष्टितां वेश्यामातामातुर्नयमाह ॥ पाणउ इत्यादि ॥ चांडालकुड्यां जलिवाङ्कुतवहोन्ववलति॰ यस्म
स्थाने पि॰ चंडालाग्निना पिपक्कर्म कि यतइत्यर्थः ॥ तस्मान्न खलु तेन परिहर्तव्या विषमदशां समं स्थिता विधिवशेन नास्थानपतिताः पु
रुषाः ॥ ३३ ॥ हालस्स ॥ सती निज भार्यां वक्रं मन्यमानं युवानमसती सवैदग्ध्यानुरागमाह ॥ जं तुम्भ इत्यादि॰ । यत्तव सतीजायायाः
सत्याः सुभगाया हृदयमपि न त्किं स्फुरत्तु प्रकरी भवतु वीजन्तव समानो युवानास्ति ॥ ३४ ॥ लच्छीण ॥ कापि कस्मिन्नप्यनुरागातिश
यं प्रकाशयन्तीह ति माह ॥ सव्वस्स मिइत्यादि ॥ सर्वस्वे पि दग्धे तथापि हृदयस्य निर्वृतिरेव । यत्तेन ग्रामदाहे हस्तात्तिः कुंडो जलव
हनार्थं वा गृहीतः ॥ ३५ ॥ मेत्रलस्स ॥ अवसरशून्यतया कापि विदग्धिका सुकमनोरथासंपादनासमर्थं नत्वहिमाहती मन्यापदेशेना
ह ॥ जाएज्ज इत्यादि ॥ अजनि मैव नो हृदेशे॰ निर्मानुषे स्थाने॰ कुब्जा न्नहत्ता पि खलु निशशाखः रुटितपत्रः ॥ मा मानुषे लोके वक्रः शार्थ
कजनस्थाने त्यागी दिनुः रसिकः सानुरागः ॥ शृंगारी वदस्त्रिर्निर्हनः॰ निरवसरश्च वद्धनिनावोद्यः ॥ ३६ ॥ अममसाहस्स ॥ असती

राम
४२

जारं प्रत्युत्तरगमातिशयं सूचयंती तन्मित्रमाह ॥ तस्स च्च इत्यादि। तस्य वसो भाग्यगुणं अमहिलासहस्रं वसाह संभ्रमः जानाति गोदा
वरी वर्षाणि विरहे गतं वसतरं तदभिसरणार्थं क्रोशमीस्तुकं ॥ ३१ ॥ मन्थरद्ध अस्स ॥ कथमेवं निःस्नेहस्मीति केनापि कामुकेन सपरिहा
समुत्का कुलटा तमाह ॥ ॥ तेवोलिग्ना इत्यादि ॥ ॥ ते व्यतिक्रांताः दूरंगता वयस्याः समानशीलाः येषु तैः सहस्नुरतसुखमनुभूतं तेषां
लताग्रहाणां स्थाणवः शेषाः वयमपि गतवयस्काः ॥ अतो मूलोच्छेद्यं गतं मुच्छिन्नमूलं नष्टं प्रेमेत्यर्थः ॥ ३२ ॥ णिरुवमसस्सा ॥ काममपिग
तयौवनां प्रति नागरकः सपरिहासमाह ॥ ॥ थण इत्यादि। स्तनजघननितंबोपरि दशनांकागतवयसां स्त्रीणां वसती घट्टी स्तनस्था
नेंगनिवासस्य मूलवंधा इव पीठीवंधा इव दृश्यन्ते ॥ ३३ ॥ संवसेणस्स ॥ ॥ दूती नायकप्रलोभनार्थं कस्याश्चिदतिसौन्दर्यमाह ॥ ॥
जस्स इत्यादि। यस्य यत्रैव प्रथमं तस्या अंगे निपतिता दृष्टिस्तस्य तत्रैव स्थिता सर्वांगं केनापि न दृष्टं ॥ ३४ ॥ अहरा अस्सा। कोपि कस्या
श्चिद्विरहेतुः स्वसंगमेव सुखातिशयं सूचयन्नाह। विरहे इत्यादि। विरहे दाहातिशयहेतुत्वाद्विषमिव विषमा ॥ अस्तमयीव भवति

स.टी. ४३ 43

केवलामृतद्रवटितेवभवतितवसंगमेअपिकांतत्सममेवकिंविक्षिनाद्भाग्यमपिविषामृताभ्यांप्रियाविनिर्मिता॥४१॥हालस्य
॥प्रवासनिषेधार्थंवेश्यामाताभुजंगमाह॥ ॥अहं मइत्यादि॥ ॥अदर्शनेनपुत्रकसुष्ठुपिस्नेहानुबंधघटितानि॥मस्पृष्टपा
नीयानीवकालेनगलंतिप्रेमाणि॥४२॥विक्रमस्य॥धूर्तैःमहवरशिक्षार्थंस्त्रीणामभिसरणोपायकौशलमाह॥ ॥पइपुरउ
त्यादि॥पत्युःपुरतएवनीयतेसृक्षिकादष्टेतिजारवैद्यगृहं॥अभिप्रायज्ञसखीकरस्थताविषवेगमूर्च्छाच्छलेनभुजयुगलांदोल
नशीलावाला॥प्रगल्भायाश्चुकेनवंकिंवक्ष्मितिभावः॥४३॥मल्लसेनस्य॥नीवजनस्यकार्यैकपरतामकृतज्ञतांचस्व
चयंतीपूर्वंसुभगानववधूसंक्रांतप्रेहंकांतमन्यापदेशेनाह॥विक्रणइइत्यादि॥विक्रीणीतेमाघमासेपामरोनीचःप्रा
वारं॥शीतत्राणावगुंठनं॥वलीवर्दैन॥निर्धूमसुमुर्मुरोयौवनसोष्मत्वेनशीतनिस्तारहेतुत्वान्निर्धूमतयाग्निकूटादित्यर्थः
॥श्यामाधाम्नोपपत्युः॥नवापीदानीलब्धनववधूकस्यकिंमयाकार्यमितिभावः॥४४॥हालस्य॥कदापिद्रोपुवि

राम ४३

श्वासो न कर्त्तव्य इति बंधुजनशिक्षार्थं काचिदाह । सच्चंभणामीत्यादि ॥ सत्यं भणामि मरणे स्थितास्मि गृहीतमरणव्रतास्मि उ
ण्यंतरे तावत्याः । अद्यापि तत्र जनतागृहे अभिसारस्थाने निपतति दृष्टिस्तस्यैव । अभिसारो नु कैवेत्याशयः ॥४५॥ चित्रदृष्टस्स । अमती
भिरभिसार्यमाणभर्तृका कुलवधूः सखीजनमाह ॥ ॥ अंधइत्यादि ॥ अंधस्य कोलिफलकंडोलमिव मातस्मो मम पतिं विलुंपति ।
चौरिकया गृहस्थिते यथैवं तिमस्त्वमेव । अतो विपरीतमेव वर्त्ततइत्यभिसंजयंत्याह ॥ छिप्पाहि त्तो देशीयः छिप्पोलां मूले शब्दः
लांगूले भ्रूः फणजाताः । मां विहाय ताएव वेष्यंतीति भावः ॥४६॥ अणुरा अस्मा ॥ अलब्धलाभादितरजनस्योल्लासातिशयो भवतीति
प्रदर्शयन्नागरकस्सहचरमाह ॥ अप्पत्तइत्यादि ॥ अप्राप्तपाशनाप्पत कुसुंभवस्त्ररंग कंहलिकस्नुषा पश्य सहचर शिक्षार्थमाह ॥
कुंजइइत्यादि ॥ शोभते प्रमोदेललितं स्वेच्छाक्रीडितं प्रियायामानः शोभतइति सर्वत्र योज्यं । ह्रमासमर्थस्य जानतश्चभणितं मौ
नं च अजानानस्य । अन्यथा तूपहास्यापव स्फुरित्याशयः अथवा अनुचितवचनविवृदितप्रियसमागमप्रतिकस्य चिद्दोषवादोयं

अ॰ टी॰ ।४८। ग्रलमस्य ॥ कापि प्रियं प्रति मन्युगलेखं लिखेति सख्योक्तामाह ॥ वेपिर इत्यादि ॥ वेपनशील स्विन्न कराङ्गुलितया परिग्रहेण
४४
स्खलितो लेखनीमार्गो यत्र तस्मिन् स्खलत्येव न समाप्यते। प्रियसखि लेखे किं लिखामः। एतेन कंपस्वेदाभ्यां सात्त्विकभावाभ्यां प्रियं प्र
त्यनुरागातिशयः सूचितः ।४९। तस्सेत्र ॥ अपि कृतार्थासीति कयापि पृष्टा सखी तामाह ॥ ॥दे छुम्मि इत्यादि ॥ ॥दृष्टे पराङ्मुखे विप्रती
हिव्रतिमपि विव्रटतेन राणं कार्यं। वालुकाशाकारमिव कथमपि बंधमेव न ददाति। खटयितुमेव न पर्याप्यते। एतेन सपत्नीनां च
मधिकार्थेनैव तावदद्यापि सिद्ध्यतीति भावः ॥५०॥ ऊतुलस्स ॥ मा तुला त्याप्पूर्वोक्तसौन्दर्यादिगुणस्य नायकस्यानुरागं कापि सानु
रागमाह ॥ मा मि इत्यादि ॥ मातुलानि हृदयमिव पीतत्वेन यूना मज्जनस्याः। शुद्धिस्नानं ऊर्ध्वं व्याजनपानच्छलात् तीर्थेन। साहृतं मा
मवलोकयता। सदंगवकुमानात। स्नानहरिद्राकटुकमपि ग्रनुश्रोतोजलं पिवता ॥५१॥ रोलए वस्स ॥ सखीदं पत्योः श्रणयशेष
मंगार्थमाह। जि वि ग्रं इत्यादि। जीवितमशाश्वतमेव न वर्द्धते यौवनमतिक्रान्तं। दिवसादिवसे अप्रमानभवंति। ग्रह हरह यौवनस्य।

राम
४४

44

कान्तस्य च परिवर्ज्जितत्वादाशयः। एतदवगम्य किं निष्ठुरो लोकः किमिति रोषपारुष्येणात्मानं वंचयतीति भावः॥ ५१॥ हालस्मा का
विरस्य योपि दुष्पथ्युन्यमानविभवं प्रियं मा स्म यमन्यापदेशेनाह॥ उपाइ अ इत्यादि। उत्पादितद्रव्याणामपि खलानां कोभंजनं च
लएवातदेव दर्शयति। पक्वान्यपि निंबफलानि केवलं काकैः खाद्यन्ते॥ ५२॥ पालित्तस्सा इति तज्जतां व्यापयन्नागरकं सहचर
माह॥ अज्ज मए इत्यादि। अयमयागत्य चंबनांधकारे पितस्य सुभगस्य श्रुतां धकारगमनशिक्षार्थ इयं महिलानिमीलिताक्षी प
दपरिपाटी पादन्यासक्रमं गृहे करोति। अज्ज्ञाशद्वो देश्यां महिलायामियं महिलैत्येव कथितः॥ ५४॥ सुचरिअस्सा॥ कस्य चित्कृत
विप्रियं जनं प्रति प्रतिकूलाचरणं दृष्टस्य प्रसादनाय कश्चित्सुजनप्रशंसमाह॥ सुअणो इत्यादि। सुजनो न कुप्यत्येव। अथ कुप्य
ति। विप्रियं न चिंतयति। अथ चिंतयति न जल्पति। अथ जल्पति लज्जितो भवति। तस्मादद्भुतमिदं सुजनस्य भवत इति भावः॥
५५॥ अज्जुणस्स॥ भुजंगस्वीकृतदूत्यग्रहणनात्यर्थं वेश्यामाता दुहितरमाह॥ ॥सो अन्यो इत्यादि। स अर्थयोऽहस्ते। तच्चित्रं यदि

रत्नरंनिर्भरे · यमने दैवाद्युपक्षाते · तद्रूपे पवत्रगुणा · गांभीर्यादयः । तद्धितान्तं शिल्यादि कौशल्यं यत्र धर्म्मः ॥ अथवा · कस्यांचित्सद्गुणग
र्विताया: प्रतिपक्षांगनारूपप्रशंसाहेयवादोयं ॥ ५८ ॥ हालस्मा । चिरप्रवासागतो नायकः प्रियतमापरितोषार्थमाह ॥ चंदमुहिद्दत्ता
दि । चंद्रमुखी चंद्रधवला · दीर्घा · दीर्घास्तिव वियोगि · चतुर्यामा शतयामेव · यामिनी कथमपि व्यतिक्रांता लंघिता · मयेत्यर्थः । त
पश्चागमनाद अस्माहं हृष्टैव विदग्धा भावमाविष्कुर्वतिलज्जयति वेति निदर्शयन्नागरकस्मह चरशिक्षार्थमाह ॥ ॥ तह सो इत्यादि · ॥
तथा सुप्रयावधा · दृष्टोदरवलिता पांथनारकं पथिकः । यथा वारितो पि गृहस्वामिनाअलिन्दकैः गृहबहिःप्रकोष्ठके सुप्तः ॥ ५९ ॥ सुंदर
स्यावेन ममेदं विप्रियं कृतं मयापि तस्येदं कर्त्तव्यमिति वदतः कस्यचित्सशिक्षार्थं कश्चिदाह ॥ ॥ लडुअंतीत्यादि ॥ ॥ लघयंती ल
घुंकुर्वती · तनुशीघ्रं प्रवर्तमानमपि परमगुरुमपीत्यर्थः । तदेव कार्यद्वयमाह । निर्वरणं दुःखनिवेदनं · अनिर्व्यूढे अकृतायां वैरशु
द्धौ । यदुक्तं । वंचनं चापमानं च मतिमान्न प्रकाशयेदिति । निर्व्यूढे पश्चान्निर्वरणं फले नैव तस्य विभावितत्वादिति भावः ॥ ६० ॥ ॥ गोवि

रमामिणो॥ द्वारस्थितिकलितकुलटाभावां कुलजां कुट्टनी विश्वासयितुमाह॥ केनेत्युग इत्यादि॥ हे पुत्रि द्वारस्थिता कं प्रलोकयसि
दूरादवलोकनार्थं सर्वकायस्योन्नामितत्वात्। तुंगस्तनोत्क्षिप्तेनात एवोन्नामितकलशनिवेशितार्द्धकमलेनेव मुखेन। ब्रूहि। साध्वय
मितेतमहमिति भावः॥ ६॥ पालितुस्सा॥ गुम्फार्थं निषेधितो पि खलः प्रस्तुतरहस्यमेव प्रकाशयतीति प्रदर्शयन्नागरकः सहचरमाह
वइत्यादि। इति चुम्बीकरणार्थं तदुपांसरो पितत्वा हृतिविवरेण निर्गतं दलं यस्य स एरंडः। आभुग्नहस्तपुच्छाकारत्वाद्धृतस्य दरवि
ततांकुचितपंचांगुलीककराकारत्वाद्धयत्रस्य कथयतीव तरुणेभ्यः। अत्र गृहे हलिकवधूरियं शुष्कस्तनीवसति॥ ६०॥ उद्वृत्तरस्स
कदाचिद्गुणदोषतां यातीति निदर्शयन्नागरकोऽभिसारिकायाः सख्याभिसारगमनविरोधिस्तनभरं प्रत्युद्वेगेनाह॥ गअकइत्या
दि॥ गजइव शोढः कलभो गजकलभस्तस्य कुंभसन्निभाभ्यां। निविडस्थूलनीरंध्राभ्यां तुंगाभ्यां। अतुच्छायां उद्ध्मितमपि न शक्य
ते किंपुनर्गन्तुं हस्तनाभ्यां॥ ६१॥ कइराअस्स॥ आशीर्वचलेनवेशपामातातनद्दिशेषआस्यारमणत्वातिशयं रमणीयानां कथयन्नी

स०टी०
४८
46

नर्त्तकीदुहितरं प्रलोभयितुं भुजंगमाह ॥ मामसपइत्यादि ॥ मामसवसूतां षण्मासगर्भिणीमेकदिवसञ्चरितां चरं गोत्रीर्णां च प्रियां पुत्र
कामयमानो भव ॥ ६२ ॥ सिरिराअस्स ॥ व्याजस्तुत्या स्तनयोरभिलाषं दर्शयन्नुपुत्रीयुवतीसपत्नीहासमाह ॥ पुडिवृकव इत्यादि ॥
प्रतिपन्नमन्युपुंजो सपत्नीजनविन्नक्षोभहेतुत्वात् लावण्यस्य कुटौ पुटौ लावण्यनिर्भरत्वात् अनंगगजकुंभौ विशेषणत्रयेपिप
रकीयावित्यभिप्रायः ॥ पुरुषशतहृदयधृतावितिचिन्ताहेतुत्वादनेकपुरुषायासकरौ किं स्तनं नौ कुंप्यंती स्तनौ वहसि न वाभ्यां माहि
ध्यं जनं स्युपकरोतीत्यभिप्रायः ॥ ६४ ॥ उहरसस्स ॥ कदापि विरोधिनोप्यनुकूला भवन्तीति निदर्शयन्कश्चिदाह ॥ वरिणीअ इत्यादि ॥ ग
हिण्याव्रतस्तनभेरणसुखपतितस्य भविष्यत्पथिकस्य ॥ अपशकुनाग्रगारकवारभद्रादिवसाः सुखायन्ते ॥ सुखहेतवो भवन्ति ॥ ६५ ॥
दुविअ्रभस्स ॥ हृतीकमपि युवानं पतिकस्याश्चिदनुरागातिशयमाह ॥ सातुहइत्यादि ॥ सा तव कृते नवालकनित्यं गृहद्वारतोरण
निषण्णा अवशुष्यति ॥ वंदनमालिकेव दिवसमेव वराकी ॥ ६६ ॥ तस्सेआ ॥ सहजगुणहीना नानामाहार्यालंकारादराः केवलमुपह

एम
४८

सायेति काचिद्व्यापदेशेनाहाहसि ग्रं इत्यादि। मयत्र फलनुध्या विश्रामार्थं शुष्कवटमुपगतैः पथिकैः यत्र फलमदृशे मुकहंदेउद्दी
ने सहहस्ततालं हसितं॥६३॥ लक्ष्मीए पत्या सहकृतकलहायाः सख्याः रात्रिवृत्तमनुसंधायागतामसखीमातुलान्याः दृष्टान्तस्सौभाग्यमा
ह॥ अज्जम्हि इत्यादि। अद्यास्मि हासिता मातुलानि तेन पादस्योत्तथापततातया पिन्वलंतीदीपवर्त्तिमभुत्तेजयंत्या तथा परुषवादि
नस्तस्य पादपतनादनन्तरं तस्याः प्रणोवनाद्यभिमानं यत्तिष्ठत्यानादरं हृष्याम महासोज्ञात इत्यर्थः॥६८॥ हालस्या सर्वसुभगासम
मं विभागाक्षिप्तां त्वसौभाग्यमवहुमन्यमानो नवसुभगां सांत्वयितुं सदोषुजनस्वभावमाह॥ अणुवन्न इत्यादि। अनुवर्त्तनं कुर्वत
ं हि प्रियजने अभिन्नमुखरागाः। आत्मवशोपि सुजनः परवशः कुलीनतायाः एते न त्वदेकगतिकोपि कुलीनतया तामनुवर्त्तते न तु स्ने
हेनेति भावः॥६९॥ तस्नेस्याः सर्वसुभगा तिरस्कारदृष्टत्वं दुर्विदग्धं शिक्षयंती जरद्वंधुवद्व(?)गाह॥ अणुदिग्र(?)ह इत्यादि। अनुदिवसवर्द्धि
तादरविज्ञानगुणे जनितमाहात्म्यः। पुत्र कुलीनज [illegible] नोविरज्यमानोपि दुर्लभ्यः॥ त

ज्ञोचितमिदंभवतइतिभावः।७०॥परकृमस्मा।विदग्धंप्रतिजाताभिलाषाकाचिन्नवकाशनायस्याभिप्रायमाह।विस्माण
इत्यादि॰।विज्ञानगुणमहार्घेपुरुषेहेप्यत्वमपिरमणीयं।जननिंदितेपुनर्जनेप्रियत्वेपिलज्जामहे॥७१॥समरसन्निणो।कोपि
कस्याश्चित्तनयुगस्यस्मरन्स्त्रीणामस्थिरप्रेमतामाह॥कहणामइत्यादि॥कथंनामतस्यास्तन्नथास्वभावगुरुकमपिस्तनयु
गंपतितं॰अथवामहिलानांविरंहृदयेकोनामसंतिष्ठते॰।स्त्रीणामस्थिरप्रेमतयाहृदिनकोपिसम्यक्तिष्ठतीत्यर्थः।असभाष्येप्रथ
मोनामपूर्वोद्दिनीयस्त्वनुमतो॥७२॥सिरिग्रंदस्सा॥पल्लविकानिवारितातयांकुरवंतीयुवासाभिलाषमाह॥सुअणुइत्यादि॥सुतनु
तुवदनंस्पर्शतंपूर्वमापल्लविपल्लवच्छविकया॰साउलिंग्रपल्लवच्छविकायांदेशीकयावारयसि॰।एतस्यपंकजस्यजानातुकतरत्सुख
स्पर्शं॥७३॥णीलस्स॥नागरकःसहचरंमानिनीमानशमनोपायशिक्षार्थमाह॥माणेमहंवइत्यादि॰।मानोपशममिवपीयते॰प्रिय
यामनस्विन्यादयितस्यकरसंपुटवलितोर्ध्वाननयावदनमदिरायागंडूषः।सुराघूर्णेनसुखेनसुखेदन्नासुरापीतामानमपनयति

तिभावः ॥७४॥ गाहवस्या ॥ हतीनायकमनुरंज यितुं नायिकायाः सौंदर्यातिशयमाह ॥ कहमाइत्यादि । कथं सा निर्वर्णयितुं
यस्या यथालोकिते ऽप्रसाधनेपि दृष्टे अंगे दृष्टिर्दुर्बला गौरिव पंके पतिता नोद्धरति । यत्र पतिता तत्रैवावतिष्ठत इत्यर्थः ॥७५॥
पवग्रकुमारस्या ॥ नायकस्य सौजन्यं वर्णयित्वा तं प्रति नायिकायाः प्रेमानुबंधार्थं हृतीखलसुजनयोः स्वभावमाह ॥ कीरन्तिच्चि
अइत्यादि । क्रियमाणे वनश्पतौ उदके रेखेव खलजने मैत्री मा उत्तमः सुजने कृता ऽनवानिरपाया पाषाणरेखेव ॥७६॥ सरलस्या ॥ वि
रशवामागतवल्लभा पुनरपि प्रविदन्सुसदैन्यमाह ॥ अग्घोइत्यादि । अग्घो इति दुःखसूचनायां । हे डुक्करकारक स्त्रीवध निर्भय पु
नरपि चिंतां करोषि गमनस्य । अद्यापि न भवंति सरलाश्ववक्राः वेण्यास्तरंगिण्याः कौटिल्यभाजः चिकुराः केशास्तत्किं न पश्यसि
रहविदशांममेतिभावः ॥७७॥ अममस्साहसस्स ॥ अनुत्पन्नत्वादनुत्सहमानस्य दुर्विदग्धधनिकस्य प्रच्छन्निपादवार्थं धूर्तासद्भा
वस्तुतिमाह ॥ एवितहइत्यादि । छेकानाम पूर्वाश्चर्वरत शिल्पकुशलानां रतान्यपि तथा न हरंति । यथा पुनरुत्केपुनः पुनःशीलि

स॰ रि॰
४८
५६

नेरागेरंज्ञनेरत व्यापारेरमिकानि॰ यथायद्भवा॰ तद्वाप थावा॰ तथावासद्भावरमितानि॰ ।७८। अहलेछीए मज्झावेरंतेमेवाहू ।। हृदव
मूलइत्यादि॰ । अनुरागनिर्भरालिंगनवशात् च्योत्यलग्रो दृढमूलवद्दग्रंथीइवमो विनोकथमपि नेनमेवाहू । अस्माभिरर्पितसो
रमिनिवातावि व कथमविमुक्तवातोस्तनौ ।।७९।। तस्मै आ ।। किमितिकृशासीति प्रियेणपरिपृष्टाश्र्वैसुभगातमाह ।। उव्वसि
इत्यादि॰ । उद्वसे प्रिययासमं॰ प्रियासहितं त्वां सततं चिंतयामीतिभावः । तथापि वमां भणसि किं कृशा भूतेति॰ । उपरिभरेण॰ हे अ
स्मुंच त्रिवलीवद्धीयंगानि॰ ।८०॰ । इमा एणि सा ।। कलहांतरिता मनुनीयागता हृतीतत्कांतमाह ।। अणुणअ इत्यादि । अनुनयप्रसादि
तया तवापराधान्न चिरंगणये त्या॰ अपराधानां वहुत्वादसभूताउभयहस्तांगुल्योयस्यास्तया चिरं रुदितं ।।८१।। विसम्मसा ।। वनविहा
रादिपरिश्रांतां कांतां निर्वर्ण्य यज्ञागारकस्तत्सखीमाह ।। सिअच्छलेणेत्यादि॰ । स्वेदच्छलेन पश्यतत्तनुके अंगे तस्या अमान्॰ लाव
ण्यमयमरतीव त्रिवलीसोपानपंक्तिभिः ।।८२।। हालस्साधु जेगंरो चयितुं ऊहदनीकस्या श्विरलब्धलाभसत्कारमादोघंपरि

राम
४८

हरंतीसौंदर्यातिशयमन्यापदेशेनाह॥देव्हाअइत्यादि।कंकेल्लिरशोकः।दैवायत्तेफलेकिंक्रियतां।इयत्तुनभणामः।अशोकपल्ल
वाःपल्लवानामन्येषांनसदृशाः।अयमाशयः।देवाधीनोलाभसत्कारोनभवतोनामतत्सदृशीपुनःसुंदरीनास्तीति॥७३॥वीजदेव
स्यास्त्वसौभाग्यख्यापनायविरहविधुरांरुदंतीकलहान्तरितांकांतांदर्शयंस्तदनुनयार्थमागतमस्तंकांतःसहचरमाह॥धुअइव
इत्यादि।प्रक्षालयतीवमृगकलंकंकपोलपतितस्यमानिनीपश्यत।अनवरतवाष्पजलभृतनयनकलशाभ्यांचंद्रस्य।एतेना
त्मसौभाग्यंप्रियायाःकांतिश्चवर्णिता॥७४॥विसमरायअस्स॥किमियमवश्यंभर्तुर्वैदूःवल्लभस्यवल्लभाभविष्यति।येनपुनरिह
नागमिष्यतितत्किमेवंविक्लवासीतिवयस्येनाश्वास्यमानोज्ञातिगृहात्प्रतिगृहंप्रस्थितायाजारस्तमन्यापदेशेनाह॥गंधेणेत्या
दि।आत्मनोगंधेननवमालिकानामध्येनयुताभविष्यति।यतोन्यःकोपिहताशायाइतिनिर्वेदसूचकंवचनंमांसलोअनन्यःप
रिमलोद्गारः॥७५॥विअस्स॥कथमपिनषध्वनत्वंनायकस्यैवेमनस्यमाशंक्यनायिकांतत्संगमंप्रतिनिरुत्साहामुत्साहयि

तुंहती सत्पुरुषप्रशंसामाह॥ फलसंपत्त्येत्यादि॥ फलसंपत्त्या समवनतानि नम्राणि तुंगान्युन्नतानि॰ फलविपत्त्या॰ हृदयानि
सुपुरुषाणां महतां तृणानि व शिखराणि॥ अथवा नष्टधनस्य मित्रस्य खेदापनोदायकस्य चिरयंवादः॥८६॥ ऊवलअस्स॥
पथिकातन्न्वायाम सखीनां संवादमाह॥ आमामेइइत्यादि॥ आ श्वासमयति जीवति तिष्ठापयति परिजनं परिवर्तमानायाः शयने
पार्श्वपरिवृत्तिं कुर्वत्याः पथिकजायायाः निस्थामनिस्सहं यद्वृत्तं नंतेन वलितेहस्ते सुखरो अत्तुवद्धनूपुरणत्कारो वलयशब्दः॥
तेन नवमीकामावस्थासूचिता॥ यदुक्तं॰ तूष्णींभावो विचेतस्त्वं जडत्वायां भवन्तीहीति॥८७॥ अलंकारस्स॥ ॥ महेल्छु नायिका
तुरंजनार्थं नायकस्य वदान्यतां परोपकारतां च शक्तावपि नं तु हन्ती कृपणनिंदां सत्पुरुषस्य च प्रशंसामाह॥ पोट्टंभरंतिइत्यादि
॥हे मातः ग्राम महिलाः शकुना अपि परमांसभुजो गृध्रा अपि उदरं विभ्रति॰ अत्तु द्विजाः स्वोदरभरणमात्रसंतुष्टाः॰ विह्वलोद्धरणभरं
सहा दीनदुःखापहारक्षुरं धुराम भवंति॰ यदि केपि सत्पुरुषाः विरला एव तत्सदृशा इत्याशयः॥८८॥ अहिमाणइंधस्सा॥ नायिका

मनुरंजयितुं हृतीन्द्रणविभवस्यापि नायकस्य महेच्छतां सूचयन्नाह॥ ॥तुंगात्विंग्र इत्यादि॥ ॥तुंगमेव भवन्तिमनो मनस्विन
अत्रिमा स्वपिद शास्तु। एतदेव दृष्टान्तेन द्रढयन्नाह॥ अस्तमनेपि रवेः किरणा ऊर्ध्वमेव स्फुरन्ति। एतेन निर्दिष्टोपमो वदान्यो
न चाधमां कामयत इत्यर्थः॥ ८८॥ मातरा ग्रस्स॥ कृत्रिमेणापि भावेन भामिन्यो मनुष्याननुरंजयन्तीति कया विदुक्ता वि
दग्ध वक्ष्यमाणमाह॥ ॥णा विणामइत्यादि। न विनामसद्भावेन गृह्यते परमार्थतो लोकः। एतदेव दृष्टान्तेनाह। कोञरन्मार्जारं इ
द विडालं कांजिके न प्रतारयितुं शक्नोति॥ ८९॥ भोइ अस्स॥ कान्त विप्रहारणार्थं कांचित्कारणमेह वर्द्धमानमव्योपदेशेनाह॥ ॥रस्सा
तु इत्यादि। अरण्यानूणं अरण्यात्वानीयं सर्वतः स्वयं ग्राह्। तथापि मृगाणां मृगीणां चामरणांतानि प्रमाणि। इह शंतत्प्रेमशा ह्यमिति
भावः॥ ९१॥ रञ्जणा अरस्स॥ प्रेमसद्भावसूचकोऽदुःखहेतुरपि प्रियासु खयति न तथा सुखहेतुरपीति निदर्शयन्नागरकः सहचरमाह॥ ना
वमइत्यादि। तापमपनयति न तथा चंदनपंकोपि कामिमिथुनानां। यथा दुःसहेपि ग्रीष्मेऽन्योन्यालिंगनसुखं॥ ९२॥ हरिउहस्स॥

स· टी·
५०
50

मुग्धवधूहृत्त्रविरुद्धां प्रथमाजोयोगस्वनस्तुत्याह्निं सपत्न्याः सपत्नीडुश्चारित्र्यख्यापनार्थमाह। त्वयालङ्कृत्यादि। प्रथमङ्कृतिशब्दोवा
त्तुसमाप्तौ· द्वितीयप्रदर्शने· ।हृतलिप्तालकाकिंतिष्ठसीति· इतिपृष्टयास्फुटयाश्रुस्तुत्य त्वयानवधा किलेत्तुपालंभः हिगुणोवेष्टि
तजघनस्थलयापटादेनेवाह्नवमाविष्कुर्वत्येतिभावः। श्रुद्धवत्वमेतदपिनजानासियन्मलवद्दासमासंभाषाणि विद्वाहमित्यहो
श्रुवैदग्ध्यंतवेतिभावः। लज्जयाश्रवनतंयथास्यात्तथाहसितं। चंदिल इतिनाम्लापितार्थे देशी ।।८९॥ श्रलकत्रस्य ॥ कुलस्त्री हृत्त शिक्षा
र्थं वधूं प्रथ श्रूंकुलवधूमाह ।। ॥हिश्रग्र इत्यादि ॥ ॥हृदयएव विलीनः न कथितोजानयित्वागृहसारं· बांधवदुर्वचनमिवदोहदोडु
गतिव धा ।।८९॥ विक्किरस्य ॥ कुलस्त्रीचरितविरुद्धं सपत्न्याधार्ष्ट्यख्यापयंतीकापिवधूंवधूजनमाह ।। ॥धावइइत्यादि॥ ॥धाव
तिविगलितस्यधम्मिल्लस्यासंयतकेशकलापस्यस्निचयस्यवस्त्रस्य संयमनेच्याहतौकरयोर्यस्याः सातथा· गौरवभयात्त्रापितभये
नविपलायमानस्यडिंभस्य बालस्यपरिमार्गोनुगमनशीलागृहिणीचंदिलइतिनाम्लापितार्थेदेशी ।।८५॥ भाउग्रस्य ॥ श्रभियो

एम
५०

ज्ञ्य नायकप्रलोभनार्थं दूती नायिकाया वयःसंधिं सौभाग्यं चाह॥ जह जह इत्यादि॰ यथा यथोद्वहति वधूर्नवयौवनमनोहराण्यंगा
नि॰ तथा तथा तस्याः स्तनुकायते मध्यो दयितश्च यः प्रतिपक्षः स पत्नीजनश्च॥१८॥ वज्जवम्माणो॥ बंधुवधूः कुलवधूः शिक्षार्थं पतिव्रता
माह॥ जह जह इत्यादि॥ यथा यथा जरापरिणतो भवति पतिर्दुर्गतो विरूपश्च॰ कुलपालिकानां तथा तथाधिकतरं वल्लभो भवति॥२०॥
पोहिसस्स॥ कमपि युवानं प्रति साभिलाषा कामिनी समानवयःशीलां मातुलानीमाह॥ एसो मामि इत्यादि॥ एष मातुलानि युवा
वारंवारेणानेकवारैर्ग्रं॰ अडअणाउं सत्यः ग्रीष्मे ग्रामैकवटोदकमिव वच्छेणग्रात्तुं वंति॰ स्तत्र॰ यं पुनरन्याः मन्त्र इति शेषः एते न स्व
सौभाग्यप्रकटनं नायिकाया इति भावः॥२१॥ मडुरस्सु ग्रणस्सा॥ संकेतस्थानसुहृदं जारं श्रावयंती ग्रसतीमतीव कुलशालिनीं दांकुर्वंती
पितृभगिनीमाह॥ गामवडस्स इत्यादि॥ ग्रामवटस्य पितृष्वसः प्रियविरहखेदेनापांडुरस्य यं पत्रं वाताहतं पतति॥२२॥ खंभस्स॥ ॥
इंगितज्ञतामात्मनः ख्यापयन्नागरकः सहचरमाह॥ पेच्छइ इत्यादि॥ पश्यत्यलब्धलक्ष्यं दीर्घं निःश्वसिति शून्यं हसति॰ यथाजल्पत्य

स्फुरदार्थं तथा तस्या हृदयस्थितं किमपि। अनामलक्ष्येति घनीयत इति भावः॥१००॥ ॥विग्रहदुग्धदस्य॥३०॥ ॥इति श्रीमदमरुशतके तृतीय
शतकविवरणं॥ ॥रसिकजनहृदयदयिते कविवरमलप्रमुखसुकविनिर्मिते। समशतके समाप्तं तृतीयगाथाशतकमेतत्॥१॥ ना
गरकः सहचरशिक्षार्थमसत्याः अन्यस्य त्रमतिमाह॥ गहवइत्यादि। गृहपतेर्गजोयमस्माकं शरणं रहोऽन्नमिति असती। भणित्वा सहृ
मागतस्य त्वरितं पल्लवेवज्ञारमर्पयति।।१।।हरिश्चंदस्य। निह्नूयमानो भावः स्वभावादेवाविर्भवतीति निदर्शयन्नीसखी शिक्षार्थमाह॥ इ
पितृष्वसः हृदये स्थितो स्माकं कुमारीणां कृत इति भणित्वा तद्गुणमतीन्तप्रियस्मरणवेगान्मोहं गतां कुमारी॥२॥ मद्ववसेणस्य॥ अ
यो ज्ञानायकप्रलोभनायहृतीनायिकायाः स्वरतावसानोपचारचातुर्यमाह॥ ॥विसमस्स इत्यादि। खिन्नस्योरसि पत्युः स्थापयति विश्र
ब्धापराह्णरमितस्य॥ आर्द्रगलत्कुसुमस्नानसुगंधि विकरभारं॥३॥ सवन्निवम्मस्स॥ ज्योत्स्नायां केलिरसिको युवा कांतायाः कपोल
कांतिमात्मनश्च दर्शनमिल्ये निर्वर्णयन्नाह॥ ॥अहमस इत्यादि। अयं मरसदंतमंडले कपोले प्रतिमागतः संक्रांतो मृगांकस्याः अंतः सि

हृरितिशंखपाण्डुरं पंदहतिवंद्रः।४।अहहयस्स भागरकः। सहचरं शिञ्जयन्न सत्याजार निह्नवं प्रस्तुयन्न मतित्वमाह।। अहहयम्हाइनया
दि।अयमस्माकं मागतोद्य कुलगृहादित्यसती जारं सहसागतस्यान्वरितं पत्युः कंठे लागयति।छेंछइअ सतीवाचकोदेशीशब्दः।५।
तस्केच्या।अविषयेपिपत्युरनयं सख्यांस पश्यन्तीसखीसख्याः सौभाग्यमाह।।पुसिअइत्यादि।शोच्छिताः कर्णाभरणेन्द्रनीलकिरण
हताः शशिमयूखाः मा ति नीवदने सकज्जलाश्रुशंकयादयितेन।घकस्सवि।।माणुरागोसुवाकस्याघिस्नोसूर्यस्यानन्यसम
तामाह।।एहहमेत्तमीत्यादि।एतावन्मात्रेत गतिसुंदरमहिलासहस्रभृतेपि।अत्तुहऽतिकेवलं तस्याः वामाईदक्षिणाईस्यात स्या
वामांगार्द्धं दक्षिणं गार्द्धमनुकरोति।नत्वस्यावयवांतरमुपमानमस्ति।।७।।महाएवस्स।किंमानविमुखीत्वमसीतिसख्योक्ता का
प्यात्मनोनुरागं स्थिरत्वेहतांपत्यु श्च मानासहिष्णुतां सूचयंतीनामाह।।जहजहइत्यादि।यथायथावादयति प्रियस्तथातथानृत्यामि चं
चलेवेल्लि।वल्लीवलयत्यंगंस्वभावस्थितेपिहृदये।वल्लीलनावलयतिवेष्टयतीत्यर्थः।।ना।अग्रगणस्त।। ।।कस्मिन्नपिकाप्यनुर

स॰टी॰
५२

कांतमनुरागं ग्राहयंती सखीमाह॥ दुःखेवं हि इत्यादि॰। दुःखैर्लभ्यते प्रियो लब्धो दुःखैर्भवति स्वाधीनः। लब्धोप्यलब्ध एव यदि यथा हृदयं तथा न भवति॰॥१९॥ तस्मै ग्राम्य कापि कलहान्तरिता जाता तु तापात् प्रियसखीमाह॥ अब्बो अ इत्यादि॰। अब्बो इति कष्टे देशीयः। कष्टमनुनयसुखकांक्षणशीलया कृतं कांतं उर्वन्त्या सरस स्वभावो पि प्रियो अविनयमार्गं विलासीनः। करोति रोषोच्चारणेऽकृतमप्यपराधं कृतमिति समुच्चारयंत्येति॥२०॥ भमरसी हस्मा॥ हती कस्याश्चिद्धि हार्त्तिका विशेषितप्रियमाह॥ ॥हत्थेसु इत्यादि॰॥ हस्तयोरपि पादयोरपि अंगुलिगणनया अतिगता दिवसाः। इदानीं पुनः केन गणयंतामिति भणित्वा रोदिति मुग्धा॥ हालस्स॥२१॥ सखी सखी कांतस्यागमनविज्ञातार्थमशकुनगर्भवसंतवर्णेन माह॥ कीरमुह इत्यादि॰। कीरमुखसदृशैः राजंते वसुधापलाशकुसुमैः बुद्धस्य चरणवंदनपतितैरिव भिक्षुसंघैः। देवताराधनं लोकहृदयहेतुः शुकमुखसादृश्येन नखक्षताकृतित्वं लभ्यते तेन च प्रियदत्तानि नखांकितमुरः स्मरंती प्रियस्मरणसंजातविरहदुःखावेगेति भावः॥२२॥ ऊसुअ अस्ता अनुनयग्रहणापेक्षेरयंती सखी मानिनीमाह॥ जंजं इत्या

एम
५२

दिः। यद्यद्यत्स्थुलमंगंतत्तज्जातंकृशोदरिकृशत्वे। यद्यत्तनुकंतत्तद्दर्पिनिषिक्तंकिमत्रमानेन। निष्ठितंनिष्ठाप्रकर्षंगतमितिदुर्वैले
ज्ञातमित्यर्थः॥१३॥ऐहार्॥पत्युरेवनत्सावल्लभातत्कथंतस्यागुणानस्तौषीरित्यभियोज्येनोक्ताहृतीमाह॥एग्गुणाइत्यादि। तद्गुणे
नञ्जिपतेजनःक्रियतेयोयेनभावितस्तेन। एतदेवार्थान्तरन्यासेनद्रढयति। मुक्तानुद्विंदामौक्तिकानगुंजाःगृह्यन्ते॥१४॥लक्ष्मीप
गमनायप्रशाकिमितिकिमपिनवदसीतिप्रियेणोक्तायाःसंबंधिनीहृष्टातत्कोतमाह॥लंकालइत्यादि। पृष्टपक्षे। लंकालयानांपु
रकवसंतमासैकलब्धप्रसराणां॥आपीतलोहितानांबिभेतिजनःपलाशवनां। लंकाशाखायाःपीतलोहितानां। इयंतुपीतरक्तानांर
क्षपक्षे। लंकारावणनगरी। वसंतमासैकलब्धप्रसराणां। वसाशमिद्रा। अत्रमुदर्स्थितं। आमलब्धप्रणक्षतमनुस्वारलोपादिकं॥अ
थवा। वसंतमासे। वसतस्तिष्ठतोजनस्यमांसंआपीतंलोहितंरक्तंयैस्तेआपीतलोहिताः। पलंमांसमश्नन्तिखादंतीतिपलाशाराक्ष
सा। पलाशानामितिशेषविवक्षयापंचम्यर्थेषष्ठी॥इवादिशब्दंविनापिश्लेषोभवतिदेशांतरेगच्छंतंपुत्रंनिवारयितुंमातुरुक्तिः॥१५

स·टी
५३

53

कालमेहस्स ॥ सखीमस्याः कांतं प्रत्यनुरागातिशयमाह· ॥ घेत्तूण इत्यादि· । गृहीत्वा चूर्णमुष्टिं हर्षोत्सुकितया वेपमानाया वि
क्खुरामीति प्रियतमं हस्तेन गंधोदकं जातं· चूर्णमुष्टिरेव गंधोदकं जातं चूर्णमुष्टिः कर्पूरादिवधूलिः । भमरणेमीति विक्खुरणो देशी· । कां
तदर्शनजातसात्त्विकभावस्वेदाद्रा इतिभावः ॥ ८६ ॥ अग्गितुहस्सा सपत्नीदेवराभिसारं सूचयंती सपत्नीमाह· ॥ भुक्किंपु इत्यादि
· । पृष्ठं प्रोञ्छकृशोदरि पश्चाद्वारं कोटपत्रविचित्रितं· छेकाभिर्विदग्धाभिर्देवरजायाभिः क्षणुके माकलय्य स्मितं यदोहरं पश्चाद्वा
रः· पश्चाद्वहगा· अंकोल्लो अंकोटोवृक्षभेदः । देशीशब्दद्वयं· ॥ ८७ ॥ विहीमणस्स ॥ आगतः प्रियो नालोकनीय इतिमानं कुर्वतिक
याः पिकाप्युक्तेरमाह ॥ अच्छीइं इत्यादि· अक्षिणी तावत्स्थगयिष्यामि· । द्वाभ्यां हस्ताभ्यां तस्मिन्दृष्टे अंगं कदंबकुसुममिवपुलकि
तं कथं नु गोपायिष्यामि· । स्थगयिष्यामीत्याच्छादयिष्यामि· दोहिमिति ड्कारः पादपूरणो· ढक्किस्सामिति देशी । ८८ ॥ भीमस्सा व
र्णासु विरहदुःखितां प्रियां स्मरन् पथिकः पथि कांतारं गृहगमनायाह ॥ कंझावाइत्यादि· कंझावतोत्तूणितेगृहे रुदित्वा निःसहनि

एम
५३

षणं॰ दर्शयति गतपतिकां विद्युद्योतोज्ज्वलक्षणेणं अत्र कुहूनी नायककृतकं नोद्यंगयः तेन च विरहदुःसहतानयाच नायकस्यशीघ्रा
गमनमिति॰॥ ॥९॥हवस्म॥ हूती ग्राम्यसंभोगं प्रति मंदादरं नायकं प्रवर्त्तयितुमन्यापदेनाह॥ पुंज सुइत्यादि॰। पुंस्त्वयत्त्वाधीनं कुतो
लवणं कुग्राम॰ सि द्धः। अथवा मलोके नापि किंतेन स्नेहो यत्र नास्ति॰। लवणं कांतिः माधुर्दकं च॰ स्नेहः प्रेमघृतादिकं चाहालस्मा। ९०॥
स्नेहयोगाद्धिरसमभिसुरसंभवतीति कापिकस्यामप्याह॥ सुहउइत्यादि॰ सुखष्टिकायाहालिकोसुखपंकजसुरभिपवननिर्वापि
तं॰। तथापिवतिप्रकृतिकटुकमप्योषधं यथा न निर्तिष्ठति। सुखष्टिकाकल्याणवार्त्ताकारिका॰ प्रकृतिकटुकं स्वभावतिक्तं। नति
तिष्टति निष्ठीव्य कर्षयति पानं न गच्छति॰ धैर्येणपिवतीत्यर्थः अनुरागातिशयादितिभावः॥९१॥ हरिराअस्मा। कस्याश्चित्स्वीकृतसं
केते जारेनामतइदमाह॥ अहमाइत्यादि॥ अयमाततच तत्रैव वानीरवने त्यक्तसंकेतानवदर्शनं विमार्गयति प्रश्रुप्रतिधानस्यानामि
व॰। वानीरेवेतसः अतस्तामनुकंपस्थान्नदर्शनेनेत्याशयः॥ ९२॥ इमाणस्म॥ नायकः सहचरंकृतापराधंभयान्नायकोपसर्पणवि

मुखयितुमाह॥ दृष्टो स इत्यादि॥ दृष्टरोषकलुषितस्यापि सुजनस्य मुखादप्रियं कुतः॥ राहुमुख इव शशिनः किरणामेव सुधां वि-
रअफरकोंतस्स। कापि नारी अभिमतसंगादनाप्रसन्नात तत्कृतोपहारं परिहरंती कोत्रदोष इति ह्रुत्यायाः क्षमानेदमाह॥ अवमाणि-
अ इत्यादि। अपमानितोपि नतथा सज्जनो ह्रियते। विभवहीनः प्रतिकर्तुमसमर्थोमन्यमानो यथापरेण॥ ५४॥ रामस्स। कृतं-
स्यापितं यथाहस्तेऊरु विश्वासकथनायशोत्साहयंतीहूतीनायिकामन्यापदेशेन परिहारमाह। कलहे इत्यादि। कलहांतरेप्य-
विनिर्गता निहृदयांतरेद्धारस्युपगता निरस्तुजनकृतानि रहस्यानि दहत्यायुः ह्नये शि॥ अपि निशिषधे। ५८। लक्ष्मी ए। कस्मिंश्चित्पथि-
के कस्याश्चिद्दुःखवार्तांकाप्याह॥ लुंबीअ इत्यादि॥ ॥स्तवकांगणमाधवीनां द्वारार्गला ज्ञाताः आश्वासः पथिकप्रलोकनेपि नष्ट-
गतपतिकानां प्राकृते। पंथोवल्मेपथिकश्च। लुंबी स्तवके। माधवीलता विशेषः। अतिमुक्तकेवाग्र्ज्यसमान्योपक्रमेणैव नायिका वि-
शेषं प्रतिपादयंतीहूती दिवैवकामुकं प्रेषयतीति च्यंग्योर्थः॥ ५५॥ विगाहमेणस्स॥ सखीसख्याः कांतं प्रति अनुरागं नयननप्रशंसां

54

